सामरहितैः केवलैर्मन्त्रैः स्तुतिः शस्त्रमित्यर्थः। सामविशिष्टमन्त्रैः स्तुतिः गुणिनिष्ठ-गुणबोधकशब्दप्रयोगः स्तोत्रमित्यर्थः। (टिप्पणी by मीमांसाचार्य पट्टाभिराम शास्त्री)।

34. About chariot race see separate note on Vājapeya.

35. See description of Svargārohaṇa in the note on Vājapeya.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Having destroyed the poverty of the scholars who had come to take part in the **Yajña** performed by the best of his gurus, Shri Ratnakar Dikshit, the king (Sawai Jai Singh) took his seat on the terrace of **Jaya Mandir** and heard with great interest the verses composed by poet Vishwanath. (V. 51)

Verses 52 to 109 contain poetic description of the firmament, stars, the moon with a black spot in it, the destitute condition of the enemies, their wives and cities, satires, riddles and other natural phenomena.

After hearing the above stanzas the king (Sawai Jai Singh) who was well-versed in the shastras could comprehend the gist and beauty of the poem and was very much pleased. Though desirous to listen more verses on love (शृङ्गार), he rose to perform his daily routine of taking bath and worshipping the gods in the temple. (V. 110)

111th verse is the usual colophonic one 'यो जात्या' etc.

CANTO IV

The eternal desire of the Ultimate Reality to multiply Itself is **Kāma,** which is the cause of creation. The *Brahman,* having no attributes, manifested itself as **Vidhi** (Brahmā), Hari (**Viṣṇu**) and **Is'vara** (Mahes'a) in union with its inherent Power (Ādimāyā) which appeared as **Pāvīravi** (Saraswati—daughter of *Vidyut*), Lakṣmī (daughter of the ocean) and Pārvatī (daughter of the Mountain). (V. 2)

It is this **Kāma** who is at the base of all शृङ्गार described in 65 verses of this canto. Union, separation and other natural as well as artificial objects which arouse emotion are dealt with in these stanzas the beauty of which lies in themselves. Verses 66 to 68 are devoted to the prayer of the **Devī.** In verse 69 the poet informs us that having thus satisfied king Shri Jai Singh, who is an incarnation of Shri Rāma on this earth, with the verses composed by himself and having submitted the complete poem to him at **Pushkar,** he (poet Vishwanath) went to Kashi, the abode of **Shiva** in order to compose another poem worthy of him.

The colophonic verse 'यो जात्या' etc. does not appear at the end of this canto in both the copies. In the colophon of 'क' manuscript it is mentioned that the poem was completed on the 9th of the bright half of Chaitra (Rāmanavamī) in Samvat 1766.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

The copy was prepared by Tularam (a favourite scribe of Sawai Jai Singh) on Kārtik Kṛṣṇā 2, 1766 V. S., 1631 S'aka under order of Bhattaji Shri Vishwanathji.

Some corrections also appear on the margin of certain pages which may be in the hand-writing of the author himself.

Ms. 'ख' appears to be a later copy. It was written by Parmanand Muni at the instance of Bhatta Harakishanji whose identity is not known (but he may be Hari Krishna Bhatta of Karnatak who acted as **Adhvaryu** in the sacrifice).

At Kashi Vishwanath composed *Shambhuvilas Kavya* a devotional poem dedicated to Shambhu or god Shiva. According to Dr. Eggeling the manuscript of *Shambhuvilas*, available in the India Office Library, London, consists of three cantos. The number of folia is 19 and it is 9"×4" in size. Written in Devanagari script each page contains eight lines.

The colopon reads :

"इति श्रीचित्तपावनजातीयरानडोपनामककविश्रीविश्वनाथकृते श्रीशम्भुविलास-नामकाव्ये तृतीयः सर्गः ।।"

The number of stanzas in canto I is 40, in canto II it is 80 and the III canto consists of 14 verses only. The date of script given at the end of second canto is :

"सम्वत् १७७६ माघ सुदी त्रयोदशी भौमवासरे लि० ।। उद्धवजी नागेश ।"

Prof. Gode in his footnote has said that according to Indian Ephemeries, Vol. VI, p. 242 this date corresponds to Thursday the 11th February, 1720.

This shows that Vishwanath composed *Shambhuvilas* between 1766 V.S. (1709 A.D.) and 1776 V.S. (1720 A.D.).

It is to be observed that Vishwanath pays homage to his guru prior to other deities in all of his three works which have been available so far. The opening verse of *Shringaravapika* and *Ramavilas Kavya* is :—

"यच्छिष्यै रचिता जयन्ति जगति ग्रन्था हि ते यान् क्षणं
दृष्ट्वा मस्तकघूर्णनं विदधते वागीश्वरोऽपि स्वयम् ।
तस्मै वैदिकतान्त्रिकाध्वरविदे श्रीढुण्ढिराजाय मे
विश्वस्मिन् स्थिरकीर्तयेऽस्ति गुरवे सद्बुद्धिदात्रे नमः ।।"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

In *Shambhuvilas* also he bows to his guru first of all but in a different verse :—

"श्रीषट्केन समन्वितं प्रथमतो नत्वा गुरुं बुद्धिदं[36]
विघ्नध्वंसपरायणं च हृदये ध्यात्वा गणाधीश्वरम् ।
नानालङ्कृतिजातिरीतिमहितं श्रीविश्वनाथः कविः
काव्यं शम्भुविलासनाम कुरुते संख्यावतां प्रीतये ।।[37]

Again :

ध्यात्वा मानसपूजनं च विधिवत् कृत्वा कविर्ब्राह्मणः
श्लोकान् विश्वगुरोः पुरोऽपठदिमान् श्रीविश्वनाथो निजान् ।"

It is pointed out by Prof. Gode in a footnote of the article mentioned above that according to Lakshmana Pandit, a contemporary author of the philosophical work **Advaitasudhā,** Vishwanath had migrated to Benaras from Maharashtra due to spiritual reasons. In support of this statement he quotes verse 14th of canto III of the *Shambhuvilas* :

"भुक्त्वा वैषयिकं सुखं कविरसौ सञ्जातबोधस्ततो
दृश्यं स्थावरजङ्गमात्मकमिदं ज्ञात्वा प्रपञ्चं मृषा ।
सर्वानन्दगृहं परात्परतरं श्रीराजराजेश्वरी-
रूपं ब्रह्म हृदि स्मरन् शिववने काश्यां स्थितिर्निर्ममे ।।"

The date of composition of **Advaitasudhā** is mentioned as 1662 A.D. (1719 V.S.) but from **Ramavilas** it appears that Vishwanath had not become a *sanyasin* till the time of its composition in 1765-66 V.S. (1708-09 A.D.). Being an ascetic he would have not written a play like *Shringaravapika* at the instance of a king between 1724 V.S. (1667 A.D.) and 1735 V.S. (1688 A.D.). It is, therefore, possible that Vishwanath might have become quite indifferent to the world (उदासीनमतिः) only after 1766 V.S. as he realises and mentions in the **Ramavilas** that he started for Kashi for composing a second befitting (उचित) kāvya.

"काव्यं कर्तुमागाद् द्वितीयमुचितं काश्यां शिवस्यालये"

---

36. A guru is honoured with six श्रीs prefixed to his name according to the following :—

षट् गुरौ स्वामिनि पञ्च द्वे मित्रे द्विगुणं ह्यरौ ।
श्रीकारा अग्रतो लेख्या एकैकं पुत्रभार्ययोः ।।

37 Compare :

नानाजातिगजादिवर्णनयुतं श्रीविश्वनाथः कविः
काव्यं रामविलासनाम कुरुते राज्ञां सभारञ्जकम् ।।९।।

R. V., canto I.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

He had, of course, visited Benaras long before but he seems to have established there permanently (स्थितिर्निर्मेमे) in or about 1766 V.S. (1709 A.D.)

The subject matter of Ramavilas Kavya is the description of Sawai Jai Singh's brave deeds, his victory in the battle of Sambhar and mainly the details of Vājapeya Yajña performed by Ratnakar Dikshit at his instance. The poetic verses seem to have been included to illustrate the figures of speech and to enhance the beauty and extent of the poem. If it was so designed Jayavilas or any other name associated with Jai Singh, instead of Ramavilas, would have been a more appropriate title. Therefore, it appears that originally the poet might have had an intention to sing the praise of Rāma[38] out of his devotion to Him or he might have planned to write a poem for the pleasure of Raja Ram Singh who was so closely associated with him. He could not have completed it due to one reason or another and then he might have made use of it according to the occasion when he was invited to attend the **Vājapeya Yajña,** performed by Sawai Jai Singh.

The following conclusions may be made out from the study of Vishwanath's works which have come to light so far :—

(1) Vishwanath was a Maratha Brahmin who had migrated to Benaras for study and later settled there (स्थितिर्निर्मेमे) for spiritual reasons.

(2) He belonged to the Chittapavan family with the surname Ranade.

(3) His father's name was Mahadeva Suri and those of his grandfather and great-grandfather were Vishnu Bhatta (Kovid) and Hari Bhatta (Pandit) respectively.

(4) Vishwanath wrote Shringaravapika natika and read it to Raja Ram Singh, to whom it was dedicated by him. Raja Ram Singh liked the natika so much that he ordered it to be staged for the entertainment of his grandson and heir-apparant Vishnu Singh and his associates.

---

38. It is obvious that poet Vishwanath was associated with Deva Bhatta, father of Ratnakar, and his family. Deva Bhatta is described as a devotee of both Rama and Shiva as appears from verse 15th canto III of Ramavilas Kavya.

It may, therefore, be surmised that Vishwanath was also a devotee of Rama and Shiva and he might have been inclined to write a kavya about Rama.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(5) The second work of Vishwanath was the poem **Ramavilas** in hand.

(6) The third and the last work was **Shambhuvilas Kavya,** the only copy of which is available in the India Office Library, London, (I. O. MSS. Catalogue, Vol. VII, No. 3850). As a poem (kavya) it was second (द्वितीय) and his last work.

(7) Vishwanath must have been much advanced in age when he composed **Shambhuvilas** at Kashi (between 1766 and 1776 V.S.) where he had settled permanently.

(8) Deva Bhatta, father of Ratnakar Dikshit, guru of Sawai Jai Singh, had become known to the ruling family of Amber much earlier. He was revered by Raja Ram Singh. (R.V. Canto III, 14).

(9) It is just possible that Vishwanath was introduced to the Amber ruling family by Deva Bhatta or any of his sons.

(10) Vishwanath had two gurus at Kashi—one Kamalakara Bhatta, the author of **Nirṇayasindhu,** and the other Dhundhiraja. Both of these are mentioned and bowed to in his works.

(11) Sawai Jai Singh was only 20 years old when the **Vājapeya Yajña** was performed by Ratnakara Bhatta in 1765 V.S. at his instance.

(12) Ratnakar Bhatta had carried out some religious performances by dint of which Sawai Jai Singh regained his possession over Amber and won the battle of Sambhar. Just after it, he performed the **Vājapeya Yajña.**

(13) Vishwanath was an eye-witness to the **Yajña** and he provides details of the performance according to the **S'rautasutras.**

(14) The description of the battle of Sambhar is only stereotyped though it is a historical fact.

(15) The verses composed as examples of various figures of speech and literary forms are superb and testify to the author's competence in language and literature. The philosophical allusions reveal his disposition and study of the subject.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(16) According to **Sawai Jai Singh Charitra** (also a contemporary work) by Atmaram Kavi, the sacrifice took place at Shyambagh on the southern bank of the **Mahāvaṭā** lake in Amber.

Besides being an excellent piece of poetry and an addition to the stock of Sanskrit poems, the **Ramavilas Kavya** provides useful information about Sawai Jai Singh, his guru Ratnakar Dikshit and his family.

The work is being published as No. 3 in the Maharaja Sawai Man Singh Memorial series, started in 1971 to commemorate the illustrious name of the late Maharaja Sawai Man Singh II, the founder of the Museum. It is according to his desire that catalogues of manuscripts and publications of important texts are being brought out by the Museum in order to enable scholars to derive advantage from this vast collection.

I am extremely grateful to the Board of Trustees especially to Her Highness Rajmata Shrimati Gayatri Deviji and Lt. Col. His Highness Maharaja Sawai Bhawani Singhji, M.V.C., of Jaipur, who, with great interest, are carrying out the pious wishes of the late Maharaja. It is under their kind patronage and with gracious encouragement that now and then I get a chance to record my loyal reminiscences of him whenever a catalogue or an edition of some rare text is published by the Museum. It is also by their grace that I am offered an opportunity to utilise the remaining energy of my life in literary studies which tend to a useful result in one way or the other and to feel the pleasure of the saying :—

"भाग्यानि यान्ति वैफल्यं नाभ्यासस्तु कदाचन"

"Fortunes may become fruitless but never so study".

I express my gratitude to Dr. Asok Kumar Das, Director of the Museum, who in spite of his other administrative engagements takes a lot of interest in my studies. He has been my confrere throughout and always helps me with his considerate advice and co-operation. Special thanks are due to Shri Ram Gopal Sharma, Assistant Librarian, for his willing assistance rendered to me in preparing this work. I should not forget this time to record my cordial thanks to Shri S. G. Tewari, an old friend of mine for his unstinted interest taken in preparing the photographs included in this as well as in the previous volume.

I am thankful to Pt. Surya Narayanji, Vedacharya, ex-professor of Veda in the Maharaja's Sanskrit College, Jaipur and his son and

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

successor Pt. Chandradhara Sharma Bharadvaja with whose help I have been able to compile a note on **Vājapeya Yajña** which is appended herewith.

Mrs. Joan Landy Erdman of the University of Chicago (U.S.A.) also deserves thanks for reading through the pre-press copy of the introduction and for making valuable suggestions.

I have been fortunate enough to enjoy friendship and goodwill of all my officers and colleagues who have always been helpful to me. I take this opportunity of recording my sincere thanks to all of them.

I hope the publication of this poem, though a small one, will prove useful to those who are engaged in collecting material for constructing monumental history of Indian literature as also in their efforts to give flesh to the dry bones of historical events as reproduced in bare history.

JAIPUR GOPALNARAYAN BAHURA

24–6–77

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

VĀJAPEYA YAJÑA

Vājapeya is the fifth of the seven forms of *Soma* sacrifice known as the seven *samsthās*[1]. The others are *Agniṣṭoma*, *Atyagniṣṭoma*, *Ukthya*, *Ṣoḍas'ī*, *Atirātra* and *Āptoryāma*. The main material (द्रव्य) used in a *Somayāga* is *soma*, the juice of soma creeper which is not available everywhere[2].

Only a *Brahmana* or a *Kṣatriya* can perform *Vājapeya* sacrifice[3]. A *Vais'ya* is not entitled to do it. It is usually performed in the autumn and never in spring. Generally it begins from the 11th of the bright half of the month and is completed on the full moon day (पूर्णिमा).

---

1. Sawai Jai Singh had established all the seven *samsthās*. He was called सप्तसंस्थाविधायी—

   'कृतषोडशदानेन सर्वतोमुखयाजिना ।
   वाजपेयाग्निचयनसप्तसंस्थाविधायिना ॥
   महाराजाधिराजेन जयसिंहेन धीमता ।
   सूत्रवृत्तिः पवित्रेयं ग्रथिता ब्रह्मबोधिनी ॥

   —colophon verse of Ms. No. 5850 (K.M.)

2. In Rigveda the soma plant is said to be connected with the moon (10/85/1). It is also said that the plant grew on Munjavana hills or on the banks of the Suṣomā river in Ārjikiyades'a (8/164/1). S'atapathabrāhmaṇa (4/5/27) gives many substitutes for soma e.g. phālguna plant, green grass and Kus'a etc. In Tāṇḍyamahabrāhmaṇa (9/3/3) Putikā is mentioned as a substitute for soma plant but its details are not given.

3. The *asuras* did not offer anything to others out of their conciet—'To whom should we offer' 'कस्मै देवाय हविषा विधेम ।' They offered everything to their own mouths i.e. they indulged themselves in self-pleasure and in satisfying their own senses. The *devas*, on the other hand, performed sacrifices for one another. But when the Prajāpati gave them *Yajña* they quarelled among themselves everybody saying "I shall take it, I shall take it first". Then they decided, "Let there be a race. He who wins, will take it and will be the senior". Under an inspiration from *Savita*, *Bṛhaspati* came out successful and Indra also. They got it. Thus the Vajapeya can be performed by a Brahmaṇa representing *Bṛhaspati* & Kṣatriya or Rājanya representing Indra. This yaña is performed in autumn शरदि वाजपेयेन यजेत ब्राह्मणो राजन्यो वर्धिकामः। तथा च तत्र ब्राह्मणो राजन्यश्चाधिक्रियेते, न वैश्यः। One who performs Vajapeya becomes *Samrāṭ*.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Vāja (वाज) means the food of the Devas i.e. Soma. It is called Vājapeya because *Soma* is the main drink offered in this sacrifice. As the Devas cherished to get *Vāja* or food through this sacrifice, it is called *Vājapeya*.

One who performs Vājapeya Yajña attains speech, vigour and glamour.

First of all a *Somapravāka* is chosen from whom *soma* is purchased. Other *ṛtvigs* (priests) are also engaged with his help. They are sixteen and are divided into four groups as below :—

(a) Adhvaryugaṇa
- (1) Adhvaryu
- (2) Pratiprasthātā
- (3) Neṣṭā and
- (4) Unnetā

(b) Brahmagaṇa
- (1) Brahmā
- (2) Brāhmaṇāchchhamsī
- (3) Āgnīdhra and
- (4) Potā

(c) Hotṛgaṇa
- (1) Hotā
- (2) Maitrāvaruṇa
- (3) Achchhāvāka and
- (4) Grāvastotā

(d) Udgātṛgaṇa
- (1) Udgātā
- (2) Prastotā
- (3) Pratihartā and
- (4) Subrahmaṇya

The *Adhvarugaṇa* recites the hymns of *Yajurveda*, the *Hotṛgaṇa* sings many kinds of hymns (वह्वृचानुष्ठानं), the Udgtṛgaṇa chants hymns from *Sāmaveda* while the Brahmagaṇa watches the whole performance. In addition to the above priests, one *sadasya* is also sometimes engaged.

On the first day the following ceremonies are performed— (1) ऋत्विग्वरणं (engaging of the priests) (2) दीक्षणीयेष्टिः (a ceremony after which the host (यजमान) becomes purified and entitled to be initiated for the performance.

On the second day प्रायणीयेष्टिः (the ceremony of acquiring *soma*). सोमक्रयः (purchasing of the *soma*), आतिथ्येष्टिः (welcoming of the *soma*) and प्रवर्ग्य and उपसद्ध are performed.

At the time of purchasing the *soma* a kind of liquor called परिस्रुत is also purchased from a eunuch (षण्ड) with hair on his body. He is called *Kes'avu* (केशव). The liquor is bought for lead (सीसक). *Pravargya* (प्रवर्ग्य) is the offering of milk to the gods *As'vinī* (अश्विनौ), *Vāyu* (वायु), *Indra* (इन्द्र), *Savitā* (सविता), *Bṛhaspati* (बृहस्पति) and *Yama* (यम). The

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

milk used in this offering is that of a she-goat with a male kid. It is warmed and ghee is mixed in three earthen pots called (महावीर) mahā-vīra, pinavan (पिनवन) and rohiṇa (रोहिण). The remaining milk after the offering is drunk by the host (यजमान) with the help of a spoon (उपयमनी) This milk is called *Dharma* and it is regarded as a symbol of life and light. उपसद् is the ceremony of offering घृत to विष्णु and सोम after the आतिथ्येष्टि. It is done three times in a day.

Third day is also a day for performing the प्रवर्ग्य and उपसद् ceremonies twice.

Pravargya (प्रवर्ग्य) and उपसद् ceremonies are performed on the fourth day also. Then the आहवनीय अग्नि is brought to उत्तरवेदी. This is called अग्निप्रणयन ceremony. Carrying of हवि: (oblations) by carts to the main altar (महावेदी) is called हविर्धानप्रणयनम्. Similarly, sacrifice offered to *Agni* and *Soma* is defined as अग्नीषोमप्रणयनम्.

Fifth is the last and the most important day, A pole, seventeen अरत्निस (cubits) in length is posted and wrapped with seventeen kinds of cloth. Seventeen pots for *Soma* juice are arranged in a line and seventeen pots for liquor are also put against them. This is called पात्रसंयोजनम. Then twenty-two animals are offered and the marrow sacrifice (वपाहोम) takes place. After the disbursement of *dakṣiṇā* an interesting ceremony of chariot-race is held.

The *adhvaryu* moves the chariot from its place and puts it near the southern *Vedi* (altar). Then he yokes the horses who have drunk water. First the right horse is yoked and then the left one. An extra horse is attached on the right wing. The fourth horse with the bridle (वल्गा) and the saddle etc. follows.

Then the *adhvaryu* puts a preparation of seventeen kinds of corn (सप्तदशधान्य) before the horses to sniff it as a share of Bṛhaspati.

All this is done with the recitation of the hymns.

Then sixteen chariots, each having four horses, are made ready outside the altar (वेदी) without chanting any *mantra*.

Seventeen drums are stuck on the right of the *āgnīdhra*. Then a man of warrior class (ājnya), standing between the pit and the pile of the rubbish (*avakara*) shoots an arrow with all his force towards the north. The place where the arrow falls is marked. Reaching there he again shoots an arrow and this action is repeated seventeen times.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

The branch of a *Ficus Glamerata* tree (*udumbara*) is posted on the seventeenth or the last point. Thus the course of the race is marked and the posted branch of the *udumbara* tree becomes the finis.

The *Brahmā* ascends the chariot, a wheel of which is stuck to a waist-high pole. If the *Yajamāna* is a *Kṣatriya*, he himself accends and the Brahmā watches the action. A pupil of the *adhvaryu* silently gets into the chariot the horses of which were yoked with the recitation of the *mantras*.

In one of the chariots a *Rājanya* or a *Vais'ya* sits holding the pot containing liquor. The remaining chariots are occupied by the other priests. Now, the chariots run in competition to reach the goal. The Brahmā chants the *Vājisāma*, prescribed for the occasion.

One of the drums is beaten for the victory of Bṛihaspati and hymns are chanted while other drums are sounded without *mantras*. If the host is a Kṣhatriya the drum is beaten for *Indra*. Five *mantras* are recited or oblation is offered to fire.

In this race the *Yajamāna* surpasses all to show that a chariot with three horses runs ahead of the four-in-hands (No doubt, this might have been the test of a candidate for becoming *Samrāt*). Then taking a round of the *audumbari* branch they all turn back to the place from where they had started. The *Brahmā* gets down, uttering a *mantra*. After this the enchanted drum is taken down with another *mantra* and the others silently. The host then descends from his chariot and puts wild rice (नीवार) pudding before the horses. After this, yoking a fourth horse to this cart, it is offered to the *adhvaryu* and the other chariots to other priests.[4]

The *adhvaryu* and the *Yajamāna* then bring, through the main door, the pot of *madhu* or *soma* from the *rajanya* or *vais'ya* who was seated in the chariot and who now waits on the north entrance to the *Vedī*. The Neṣṭā brings sprituous liquor pot from the back-door and exchanges it with the madhupātra saying "*Soma* represents truth, prosperity (समृद्धि) and light while *Surā* is untruth, grief and darkness." This is called *madhugraha* and it is passed over to the *Brahmā*

The Yajamāna's wife puts on a miniskirt made of silk or Kus'a (grass), known as *chaṇḍātaka*, on her garments which she wore at the

---

4. It is said that the priests were given cash and the *Rathākhanā* was established with those chariots of different kinds by Sawai Jai Singh.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

time of her दीक्षा (consecration). It means covering the impure part of the body with pure clothes. She is then led by the *Neṣṭā* to the seat of the Yajamāna. There, on his right, is an octagonal pole (yupa) of *Bilva* or *Khadir* wood seventeen cubits in height. It is wrapped with seventeen pieces of cloth and on the top of it is put a cover made of wheat flour. This denotes the extreme limit of a man's kingdom. A ladder is made to rest on the pole. The *Yajamāna* climbs it and invites his wife. "Come, let us ascend the heavens." (जाय एहि सुवो रोहाव) Then they both climb the ladder and say "Now we have become the progeny of Prajāpati. Reaching the summit of the pole the *Yajamāna* touches the cover made of wheat and says 'Be it nectar.' Then he looks into the four directions and says "May we become equipped with the power of senses and the manly power as well from you. May we get intellect and strength from you." A handful of sand collected from a barren land is handed over to him on a '*pīpal*' leaf and he says, "I bow to mother Earth, I bow to mother Earth." Then he descends and puts his foot on the skin of a he-goat (बस्ताजिन) with a gold plate spread by the *adhvaryu* on a wooden *chowkī*. The *adhvaryu* says "This is your kingdom." He makes the *Yajamāna* seated on it and says, "You are the ruler, you are the controller, you are firm and strong; we have made you king for agriculture, peace, happiness, protection and prosperity."

As many varieties of corn as possible or at least seventeen, are mixed and oblation is prepared which is offered to *Agni* near the *udumbara* branch. One kind of corn is then separated from the lot. The Yajamāna gives up eating that corn for the rest of his life. This is to show that a man should not cherish to eat away all the corns created by Prajāpati. The remaining हविः is laid in fire for seven times. This is known as वाजप्रसवीय. Thus the *Yajamāna* pleases those gods who have been invested with kingship (अभिषिक्त). The *adhvaryu* performs the investiture of the *Yajamāna* with the remaining material of the होम (sacrifice).

The *Yajamāna*, *adhvaryu* and the other priests then take their meals out of the remaining corn. Then the *Yajamāna* descends from his *chowkī*.

The *Yajamāna*, his wife and all the priests each wear a gold-chain at the time of beginning the sacrifice. They retain these chains with them after finishing the *yajña*.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

काव्य
रामविलासपन्न
वीसनाथ भट्टजी कृत

सालका ॥६८॥ सचामरक्षाधिजामलजयोनिजा सेवितं नम
न्निरासुंदरीनिखिलंनपादप्रभं ॥ सुरद्रुमवनांतरेमणिगृहे
शिवांकेस्थितंसहावसतुमानसे गिरिपतेरयत्संभुभं ॥ इतीएवं
श्रीजयसिंहनामनृपतिसंतोष्यपद्मोनिजैः श्रीरामस्यकलावि
तारमवनौश्रीविश्वनाथः कविः ॥ श्रुत्वाथसमप्यकाव्यसु
कृतंतस्मैवरेपुष्करेब्रह्मकुंडगाद्वितीयमुनिते काश्यांशिव
स्यालये ॥७०॥ ॥ इतिश्रीत्रिपाठनजातीयरानोपनामक के
दिविश्वनाथभट्टपंडितविरचितेश्रीरामविलासनामकाव्ये
तुर्थःसर्गः ॥ सं७११ वैशाखुद२ रामनवम्यांसे लिखितं सं७११ शाके३
कार्तिकवदि२ लि. तुलाराम भट्टजी श्रीविश्वनाथजी कस्यास्तपा
॥ श्रीरस्तु ॥ ॥ मंगलमस्तुदयश्चाक्ष ॥ श्रीरामायनमः ॥

रामविलासपन्न
पुस्तक सं४पृ ॥

Last and colophon page of Ramavilasa (a), 1766 V.S.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



First page of Ramavilasa (b)



Colophon page of Ramavilasa (b)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ श्रीः ॥

चित्तपावनजातीयरानडोपनामकश्रीविश्वनाथभट्टविरचितं

रामविलासकाव्यम्

प्रथमः सर्गः

॥ श्रीगणेशाय नमः ॥

यच्छिष्यै रचिता जयन्ति जगति ग्रन्था हि ते यान् क्षणं
दृष्ट्वा मस्तकघूर्णनं वितनुते वागीश्वरोऽपि स्वयम् ।
तस्मै वैदिकतान्त्रिकाध्वरविदे श्रीढुण्ढिराजाय मे
विश्वस्मिन् स्थिरकीर्तयेऽस्ति गुरवे सद्बुद्धिदात्रे नमः ॥१॥

यो वर्णांश्चतुरः समस्तजगतां हस्तैश्चतुर्भिर्निजै-
र्नित्यं यच्छति यश्च कर्मणि शुभे प्राक् पूज्यते सज्जनैः ।
तं वन्देऽखिललेखशेखरशिखारत्नावलीच्छायया
नित्यं रञ्जितपादमेकदशनं प्रत्यूहनाशेच्छया ॥२॥

चञ्चद्वेणिजटं नतोन्नतलसद्भ्रूवल्लिदिव्यांशुक-
द्वीपित्वक्परिशालिपीतसितभं हेमाहिभूषान्वितम् ।
किं ब्रह्मेति विवादमत्र विदुषां हर्तुं यदेकीभवत्-
तल्लोकत्रयमङ्गलं विजयते द्वन्द्वं किमप्यद्भुतम् ॥३॥

कैलासे सनकादयो मुनिगणा ब्रह्मादिदेवान्विताः
श्रीमत्कल्पतरोरधो मणिमये पीठे स्थितं सर्वदा ।
यं संपूज्य सुवर्णवारिजकृतैर्माल्यैर्मृडानीयुतं
नृत्यं गीतपुरःसरं विदधते तस्मै नमः शम्भवे ॥४॥

यं ध्यायन्ति सनातनं मुनिगणा अद्वैतबुद्ध्या सदा
वेदैरप्यवगम्यते न महिमा यस्यातिलोकोत्तरः ।
तस्मिन् सर्वसुपर्वपूजितपदाम्भोजे जगत्कारणे
भक्तध्वान्तविधूननैकनिपुणे कृष्णेऽस्तु मे मानसम् ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्मिन् पूर्वाद्रिशृङ्गोपरि कृतचरणे नश्यति ध्वान्तधारा
लिप्तं हेमाम्भसेव प्रभवति भुवनं रञ्जितं यस्य भासा ।
कृत्वा नानावपूंषि द्विजजनमिषतो विष्णुनाऽऽराध्यते यो
मह्यं भूयात् स देवो निरुपमविभवो भूयसे मङ्गलाय ॥६॥

शुम्भाद्ये दनुजव्रजे विनिहते यां स्तोतुमब्जासनः
संजातश्चतुराननश्च बलजित् द्रष्टुं सहस्रेक्षणः ।
प्रीतोऽर्चामिषतो वितीर्य सकलां यस्यै श्रियं शङ्कर-
श्चक्रे जागरणोत्सवं भगवती सा संततं पातु नः ॥७॥

पूर्वं त्रेतायुगे यो दशरथसदने दीप्ततेजा अयोध्या-
पुर्य्यां देवो बभूव त्रिभुवनतिलको राक्षसानां निहन्ता ।
सोऽयं श्रीसूर्यवंशे[1] यवनकुललयं कर्तुमाविर्बभूव
श्रीमानाम्बेरिनाम्न्यां पुरि जयवदनो नाम सिंहो नरेन्द्रः ॥८॥

अस्मिन् श्रीजयसिंहनाम्नि नृपतौ नित्यं कलावर्तिनः
श्रीरामस्य पराक्रमेण यशसा दानैश्च संशोभितम् ।
नानाजातिगजादिवर्णनयुतं श्रीविश्वनाथः कविः
काव्यं रामविलासनाम कुरुते राज्ञां सभारञ्जकम् ॥९॥

प्रीत्यर्थं रघुनायकस्य जगतां नाथस्य नानाविधा-
स्तास्ताः स्वाः कविताविलासरचना विद्वत्सु च ख्यापितुम् ।
श्लोकैः स्वैः कविविश्वनाथविदुषाऽरब्धो धियाशालिनां
ग्रन्थोऽयं विदुषां करोतु हृदये हर्षं गुणग्राहिणाम् ॥१०॥

आसीत् सूर्यकुले द्वितीयमनुवच्छ्रीमानसिंहाभिधो×
राजा रञ्जितपण्डितेन्द्रनिवहः सिंहोपमो विक्रमे ।
कीर्त्या सर्वदिगन्तनित्यगतयाऽप्यासन्नया सर्वदा
यो विद्वद्भिरिहाखिलेषु वसुधापालेषु पूर्वं स्मृतः+ ॥११॥

---

१. ख. कूर्मवंशे । ×–मनूपमनिभः श्री····(शृ० वा०) । + कर्णश्रीवलिभोजराजगणनाकाले पुरा कीर्तितः । (शृ० वा०) ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्मिन्नित्यं समन्ताद्व्रजदिभतुरगभ्राजि जिष्णौ प्रयाते
शत्रून् जेतुं यथाभूत् प्रथममहिपतेर्भारदुःखं तथाग्रे ।
सौख्यं धूल्युज्झभारप्रतिहतिभिरभूदेवमेवामरीणां[२]
धूल्युद्वेगानुभूतेरनुसुखमभवन्नूतनानां पतीनाम् ॥१२॥*

यस्मिन् वेदप्रसिद्धान्यधिमहसि महाशब्दपूर्वाणि दातुं
दानान्यासक्तचित्ते सति लघु समगात् सूरिदारिद्र्यमन्तम् ।
एतत् किं वा निगाद्यं[३] बुधकरगलितं दानतोयेन सार्द्धं
लब्ध्वा रत्नं[४] प्रभूतं जडपतिरपि यद् भूरिरत्नाकरोऽभूत् ॥१३॥*

यस्मिन् शासति मेदिनीं सति हृदा सर्वेऽप्यशोका जनाः
कान्त्या काञ्चनकेसरा भुजबलैर्जाताश्च कर्णार्जुनाः ।
तद्राज्ये फलशालिनी सुमनसामासीत् समृद्धिः परा
या सर्वाध्वरपूजने समुचिता नानागुणैरञ्चिता ॥१४॥*

तस्मात् कीर्तिसितीकृतात् त्रिभुवनाच्छ्रीपूर्णिमाचन्द्रवद्-
भूमीन्द्राद् भुजशालिनः किल जगत्सिंहः कुमारोऽभवत् ।
सर्वान् यो युवराज एव वशयामासारिसार्थान् यथा
मातङ्गान् सृणिरोजसाऽऽजिशिरसि श्रीकार्तिकेयोपमः ॥१५॥

खड्गैः खड्गान् द्विधा यो रणभुवि कृतवान् सायकैः सायकौघान्
भल्लैर्भल्लान् रिपूणां रथगजतुरगानाजिकृद्यो ददानः ।
कुर्वन् सन्देहपुष्टिं रिपुमनसि दधौ देहपुष्टिं स्वयं य-
श्चक्रे रक्तैररीणां भुवमरिकरिणां चित्रयुद्धे प्रवीणः ॥१६॥*

तस्मिन् वन्दिमुखाम्बुजेषु मधुरान् श्रीसाधुवादान्निजान्
धृत्वा वासवमित्रतां सति गते तत्पुत्र उर्वीमिमाम् ।
पश्यन् सन्× सुशुभेतराभिह महासिंहाभिधः सम्पदा
यश्चासीद् धनदोपमो गुणिजनैः सार्द्धं वसन्+ सर्वदा ॥१७॥

---

२. ख. प्रतिह्रसिभिरभूदेवमेवासुरीणाम् । *पद्यान्येतानि शृङ्गारवापिकायां नोपलभ्यन्ते ।
३. ख. निगाधं । ४. ख. द्रव्यं ।
× शासत् सन् (शृ० वा०) । + गुणिजनग्रामप्रदः (शृ० वा०) ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मान्मानिजनादिनाम्न उदभूद्राज्ञो महामानवान्
राजा राजदुदारचारुचरितो विश्वम्भराभूषणम् ।
नाम्ना श्रीजयसिंह इत्यभिहितो दानैस्तु कर्णाधिको
बुद्ध्या चित्रशिखण्डिनन्दनसमो× देवेन्द्रतुल्यो रणे* ॥१८॥

तस्याशेषाचलेशैरनुसृतसरणेः▽ श्रीसुधर्मोपमायां
केचित्तार्क्ष्यं सभायां+ कतिचन विबुधाः साङ्ख्यपातञ्जले च ।
केचित्साहित्यशाब्दे तत इतरबुधा भाट्ट५वेदान्तशास्त्रे*
व्याख्यायावाप्य मानं निजवसतिगृहं यानवन्तो∠ हि जग्मुः ॥१९॥

यस्य प्रत्यर्थिपृथ्वीपतिसमदगजान् जेतुमुद्योगभाजि
स्वर्गस्त्रीवैरिपत्नीनयनसरसिजे स्फूर्तिकम्पः समोऽभूत् ।
चित्रं त्वेतत् फलं ताः पतिभिरधिगता नूतनैः संगमे का
अन्या जाता अकस्माद् भुवि पतिरहिता हंत मुग्धाः समस्ताः ॥२०॥*

जिह्वा कस्य कवेस्तथास्ति सबला येनास्य राज्ञो गुणा
वक्तव्या निजबुद्धिऋद्धिवसिताऽऽशेषान्यभूमीपतेः ।
पाण्डित्यं किमितोऽपि यो हि विबुधग्रामेऽपि वाचस्पते-
रग्रे गोत्रभिदेऽपि दैत्यविजयोपायं समाभाषते ॥२१॥*

सूनुस्तस्य सुधार्णवोदितसुधाधामोपमो दीप्तिभि-
र्भूमीन्द्रस्य जयन्तवन्नयनयोः पित्रोः सदानन्दकृत् ।
राज्यं प्राप पुरो[रू]रवा इव परः श्रीरामसिंहाख्यया
विख्यातो भुवि विक्रमाञ्चितभुजो युद्धेषु पार्थो यथा⊖ ॥२२॥

× बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः ।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ इत्यमरः
* सिंहोपमो विक्रमे (शृ० वा०) ।
▽ शेषाचलार्चितपदसरणः (शृ०वा०) । ५. ख. सान्द्रवेदान्तशास्त्रे । + तार्किसभायां (शृ०वा०) । * श्रौतयोगे च शास्त्रे (शृ०वा०) । ∠ यानवन्तश्च जग्मुः (शृ०वा०)
* २०-२१ पद्ये शृङ्गारवापिकायां नोपलभ्येते । ⊖ श्रीपार्वतीपुत्रवत् (शृ०वा०) ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अहो विविधमङ्गला लसदनन्तकेतुप्रभा
प्रभूतकविसंकुला बहुविधैर्बुधैरुज्ज्वला ।
दिवं हसति यत्सभा सकलशास्त्रसाहित्यवाग्-
विचारमुदितान्तरैर्द्विजपतिव्रजैरञ्चिता ॥२३॥

येन श्रीब्रह्मपुत्राभिधनदपुलिने स्वर्णपृथ्वीप्रदानं
चक्रे यस्मिन् द्विजास्तेऽप्यतिधनिन इह क्ष्मान्तरालेष्वभूवन् ।
यैः कर्णै रुक्ममत्र श्रुतमपि[६] न न तच्चित्रमेतत्तु किन्तु
ब्रह्माप्यन्यं वदान्यं भुवि न हि कृतवान् वीक्ष्य तं वीरमान्यम् ॥२४॥

जीवामोऽत्र वयं नवेति हृदये सन्देहमुत्पाद्य यो
देवोऽलङ्कृतिविद्विरोधमखिलं दूरीचकार द्विषाम् ।
यो युद्धेषु जयश्रियान्वयमहो प्राप्यापि साहित्यभाक्
लोके नान्वयदर्शनं समभवच्छ्रीरामवद् वीर्यवान् ॥२५॥

तस्य श्रीयुतरामसिंहनृपतेः श्रीकृष्णसिंहाख्यया
ख्यातोऽभूत्तनयो यथा रघुपतेर्जज्ञे कुशो नन्दनः ।
यो नानागुणिदत्तभूरिविविधद्रव्यो रणे मार्गणै-
र्विद्धारातिगणो मुदास्य[७] कविभिः संस्तूयते सर्वदा ॥२६॥

तस्मिन् भूरितरान्निजान् रिपुगणान् हत्वा पितुः प्राग्दिवं
प्राप्ते तत्तनयो विचारितनयः श्रीविष्णुसिंहो बली ।
राज्यं प्राप्य हरेः पुरं प्रति गते श्रीरामसिंहे नृपे
यो धर्मेण जनानवन् रिपुगणान् चक्रे दिगन्ते गतान् ॥२७॥

दानं तस्य समस्तपार्थिवसभाभूषामणेः किं मया
वाच्यं येन समर्पितं धनमहो अद्यापि विद्वज्जनाः ।
भुञ्जन्ते प्रतिमन्दिरं च वसुधा चक्रे समस्ते नृणां
यस्योच्चैर्वदनाम्बुजेषु सततं जागर्ति दोर्विक्रमः ॥२८॥

---

६. क. द्वारैरुक्ममत्रस्रुतमपि ।
७. ख. मुदा स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्मिन् श्रीमति वर्ष्णुसिंहनृपतौ स्वाखेटलीलां क्षितौ
कुर्वाणे सति मन्दिरेषु वणिजां सेराः स्थिता नो वने ।
ऋक्षं व्योम्नि मृगश्च पावनमुखे% रोजो+ऽवतारेष्वहो
कोलः क्षत्रियनामसु स्थितिमगात् सिंहोऽथ देव्यासने ।।२९।।

अस्मिन् राज्ञि जले च खे च मृगयां प्राप्तेऽवतारेष्वहो
मत्स्यः कूर्म उभौ स्थितौ न हि जले कर्कः स्थितो राशिषु ।
भारद्वाज ऋषिष्वभूत् खगपतिर्हंसोऽज विध्यासने
तोये सारसभा बभूव[८] च कुलंगो× व्यञ्जनेषु स्थितः ।।३०।।

धर्मास्तस्य कुलोचितान्नरपतेः को वर्णितुं शक्नुयाद्-
यश्चैतादृशसप्ततन्तुषु* सदा कालं मुदा नीतवान् ।
इध्मा यत्र रिपुव्रजाः समभवैस्तत्कीर्तयः पायसं
तत्सम्पन्मखदक्षिणा च समभूच्छ्रीसंगता सिद्धये ।।३१।।

तस्मिन् देवसमानचारुचरिते श्रीविष्णुसिंहे नृपे
गीर्वाणेन्द्रसहायतां सति गते तत्पुत्र उर्वीतले ।
राज्यं श्रीजयसिंह इत्यभिधया ख्यातोऽत्र लेभे स्वयं
धर्मज्ञैः सह पण्डितैः प्रतिदिनं न्यायान् समालोकयन् ।।३२।।

येनागस्त्यरुचा प्रकाशितदिशि प्राप्तेव दोर्विक्रमा-
स्ताते जीवति भानुतुल्यमहसा नानाविधाश्चक्रिरे ।
हत्वा शस्त्रधरान् प्रचण्डयवनान् चाण्डालरूपान् बहून्
गावस्ताः परिरक्षितास्त्रिजगतीसंवासिनां मातरः ।।३३।।

कामोऽनङ्गोऽस्ति चन्द्रः स च मलिनवपुः पिङ्गचक्षुः कुबेरो
नानानेत्रैः कुरूपः सुरपतिरथ यः पाशहस्तो दिगीशः ।

% पावनमुखे चन्द्रमसि ।
+ रोजः पशुविशेषः भाषायां । शब्दस्यास्यावतारवाची पर्यायो नोपलब्धः ।
रः कामो वह्निः सूर्योऽथ तोयधिरिति सौमरिनाममालायाम् । रात् तोयधेः जातो रोजः । रोजो धन्वन्तरिरवतार इति कवेरभिप्रायः प्रतीयते ।
८. ख. सारसवृन्दमास । × कुलंगःपक्षि विशेषः । * यज्ञीयसप्तसंस्थासु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोऽपि ख्यातोऽत्र लोके जडमतिरिति तद्विष्णुसिंहस्य सूनोः
साम्याभावाज्जगत्यां गुणगणजलधिं वर्णितुं शक्नुयात्कः ॥३४॥

संग्रामाङ्गणमागतं गुणियुतं श्रीविष्णुसिंहात्मजं
भूपं वीक्ष्य समीपगा रिपुजना वेपन्ति× वेपन्तु× ते ।
दूरस्थं रविमण्डलं यदपि च स्वर्गस्थरम्भाकुच-
द्वन्द्वं वेपति× तन्मदीयहृदये चित्रं समुज्जृम्भते ॥३५॥

राजास्यां जयसिंह एष सुमुखश्रीः सत्यवादी क्षितौ
पाण्डोः सूनुरिवास्ति कौतुकमिदं किं वा वयं ब्रूमहे ।
यस्योऽयं रविवंशजात जननान्स्वस्यात्मवत् सर्वदा
सर्वान् रक्षति मानवाँस्तदखिलं कर्मास्य वन्दामहे ॥३६॥

श्रीरत्नाकरदीक्षितोत्तमगुरुप्राप्तेष्टदेवार्चना-
सामर्थ्यात् पुनराप्तराज्यविभवः सोऽयं नृपो मानवान् ।
कृत्वा शाहबहादुरेण यवनाधीशेन सार्द्धं परं
पातसाहेन विरोधमत्र यवनान् हन्तुं प्रवृत्तोऽभवत् ॥३७॥

कस्मिंश्चित् समये नृपोऽयमखिलैः सैन्यैर्निजैरन्वितो
धाम्नाऽस्यां भुवि भास्करेण सदृशो राज्ञां वदान्यो महान् ।
तीर्थानां प्रथमे महामलहरे स्नातुं वरे पुष्करे
दानानि ग्रहणे च सूर्यशशिनोर्दातुं द्विजेभ्यो ययौ ॥३८॥

स्नात्वा पर्वणि तत्र धेनुधरणीग्रामेभवाहान् ददौ
स्वर्णं चान्यदपि प्रियं बसु ददौ पात्रद्विजेभ्यो नृपः ।
पश्चादुत्तमभोजनानि दिनशो दीनान्धकुब्जातुर-
प्राणिभ्योऽपि ददौ महारुचियुतो वेदोक्तदानेष्वहो ॥३९॥

दत्वा दानानि राजा बहुमुदितमनाः सांभरे शीघ्रमेव
ग्रामे प्राप्तो बभूव द्विषदहितमहाराजसेनासमेतः ।

× आत्मनेपदस्यानित्यत्वात् परस्मैपदम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रप्रस्थात्तुरुष्कोऽप्यथ बहुपृतनासंयुतो बन्धुवर्गैः
साकं तत्रातिवीर्यैर्गजतुरगगतैराययौ बाणवर्षी ।।४०।।

तत्रात्युद्भटराजपुत्रसुभटाः श्रेष्ठास्तुरुष्कोत्कटाः
पुष्टाः सैयदमर्कटाः प्रथमतो दुष्टा मृधं चक्रिरे ।
बाणैर्यत्र नभो भृतं रविमहोऽप्याच्छादितं दुःश्रवै-
राग्नेयास्त्ररवैः सहैव सकलाः सिंहध्वनींस्तेनिरे ।।४१।।

लङ्कायामिव राक्षसैरथ महायुद्धं तुरुष्कैः कृतं
भल्ली भल्लकमण्डलाग्रविशिखैः कीर्णं नभोमण्डलम् ।
जानन्ति स्म न किञ्चिदन्यदिह ते बाणावलीमोचने
दत्तान्तःकरणा गिरैव विविदुः स्वीयान् परान् मानवान् ।।४२।।

राजा किञ्चिदसौ विलोक्य यवनाधिक्यानि नाथावता-
नन्याँश्चापि हि मानसिंहनृपतेः सन्तानजान्@ बाहुजान् ।
संज्ञाप्य स्वयमुन्नते बहुबले स्थित्वाथ दन्तावले
युद्धं युद्धविदांवरो व्यरचयन्नानाविधं सुन्दरे ।।४३।।

केचिद्विद्धा अविद्धा दृढफलविशिखैः पञ्चतां केऽपि नीता×
भल्लप्रोतप्रतीकाः कतिचन मलिनाः खड्गपातैः प्रभिन्नाः ।
राज्ञा भूरिप्रतापाद्भुतभुजयुगलेनापरे वाहनेभ्यो
भूमौ नीतास्तुरुष्काः पुनरपि सहसैवोत्थिताः प्राणवन्तः ।।४४।।

लङ्कायां पुरि राक्षसैः सह यथा रामो महावीर्यवान्
नाके दैत्यगणैः समं दिविषदां नाथो यथा कीर्तिमान् ।
पाताले गरुडो यथा विषधरैः साकं तथा बुद्धिमान्
युद्धं श्रीजयसिंह एष यवनैः सार्द्धं पुनः मृष्टवान् ।।४५।।

अर्द्धाङ्गाः कतिचित्कृताः कतिचन छिन्नैकहस्ताः परे
नासाहीनमुखा द्विषो विरचिता अन्ये गतैकाङ्घ्रयः ।
नास्त्येकश्रवणा नृपेण यवनाः सम्पादिता केऽपि ते
दीर्घश्मश्रुधरा जलेषु विविशुः क्षाराम्बुधेर्निस्त्रपाः ।।४६।।

@ मानसिंहोत इति लोके प्रसिद्धान् क्षत्रियान् । × मारिता इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राज्ञोऽग्रे खलु रावुरावलयुताः कुम्भाणिनाथावताः
खण्डेलाः सबलाः नरोकसहितास्ते मानसिंहावताः ।
खड्गारान्वयजाश्च कुन्तलकुलोत्पन्ना हि शेखावताः
राठोडैः सह मिश्रिता व्यरचयन् संग्राममेते भटाः ।।४७।।

झटाझटिसमुत्पतत्कटुककण्टकित्रोटिता–
रटत्करटिपृष्ठतः× क्षितितटागतैरुत्कटैः ।
अभूद्यवनमर्कटैर्भयकरी तथाऽऽजेस्तटी⊖
यथा मृतनिशाटनै⊿ विकटभूमिलङ्काटवी ।।४८।।

इत्थं स्वैर्विशिखैर्निहत्य विशिखान् सर्वान् जयश्रीयुतो
भूपो वन्दिजनाननाद् बहुविधान्युच्चैः कवित्त्वानि सः ।
शृण्वन् सन् शिविरं जगाम शरणंयाताँश्च मुक्त्वा हि तान्
धर्मद्वारमदादजातरिपुवद्राज्ञां महाधार्मिकः ।।४९।।

आजौ प्राप्तजयो जयोपमबलो दानं द्विजेभ्यो बहुः
प्रादादेष ततो द्विजा बहुमुदो राज्ञोऽग्रतो मञ्जुलान् ।
श्लोकान् श्रीकविविश्वनाथरचितान् पेठुः सुबन्धान् रसै–
र्भूषाभिश्च सुशोभितान्△ सुमनसां चेतःसु हर्षप्रदान् ।।५०।।

यो जात्या भुवि चित्तपावन इति ख्यातस्ततोपाख्यया
विख्यातः खलु रानडा इति जडाज्ञानापहानौ कृती ।
तस्य श्रीकविविश्वनाथविदुषो दोषोज्झितैषा कृतिः
कुर्याच्चेतसि सम्पदं[९] बहुविधं संख्यावतां❊ सम्प्रति ।।५१।।

इति श्रीचित्तपावनजातीयरानड्योपनामककविविश्वनाथपण्डितकृते श्रीरामविलास-नामकाव्ये प्रथमः सर्गः ।।१।।

× इभगण्डौ करटौ; करटौ यस्य स्त इति करटिः । हस्तिपृष्ठत इत्यर्थः ।

⊖ आजेस्तटी रणभूमिः । ⊿ निशाटनैर्निशाचरैः ।

△ विविधालङ्कारैरलङ्कृतान् ।

९. ख. सम्मदम् ।

❊ संख्यावान् पण्डितः कविरित्यमरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वितीयः सर्गः

आश्चर्यं किमिदं पुरन्दरसमश्रीकस्य भूमीप्रभोः
के वाऽस्यां भुवि चारु रामचरितं जानन्ति लोका हि नो ।
धन्यं सूर्यकुलं कुलेषु रुचिरं यस्मिन् भवन्तीदृशा
भूपाला इह ये महैस्त्रिभुवनं सम्प्रीणयन्ते सदा ॥१॥

राजँस्त्वत्कीर्तिहंसी रणपतितभवद्द्वेषियोषाकराब्जात्
स्रंसच्छंखीयभूषाबिसरसनवशाद्देहपुष्टिं दधाना ।
इन्दोर्योगात् प्रसूतांबरसरसि च निजापत्यवृन्दं तदम्भाद्
धृत्वा बालोचितं किं व्रजति दिवि सुधासारमाहर्तुमेषा ॥२॥

त्वद्दानातिशयं विलोक्य सहसा सञ्जातशङ्काः सुराः
स्वस्वर्णाचलरक्षणाय निदधुर्द्वौ निर्जरौ कातराः ।
एको यामिकवत्तयोर्निशि कलानाथः परो वासरे
श्रीभानुर्भ्रमति प्रदक्षिणमिदं नो देव जानीमहे ॥३॥

राजँस्त्वत्कीर्तिवार्द्धिः कविजनसदसां जीवनं रङ्गभूमि-
र्नक्राणां नागराजाभ्रमुपतिशशिनां दृश्यते कोऽप्यपूर्वः ।
यस्मात्तस्याधुनापि त्वदसिकनिहतारातिपञ्चासुवात्या-
सम्पर्कादुत्प्रयाता दिवि जलकणिकास्तारकीभूय भान्ति ॥४॥

सौवर्णस्य गिरेः प्रदक्षिणविधिं कुर्वन्नसौ भानुमान्
मध्याह्ने स्थिरतां प्रयाति घटिकामात्रं त्वरावानपि ।
हेतुस्तत्र भवद्वितीर्णकनकक्षोणीभृतो दर्शना-
ज्जातो मेरुगिरिभ्रमो[१०] विजयते धिक् धिक् परां कल्पनाम् ॥५॥

उत्पन्ने धनदे त्वयि क्षितितले सर्वोपरि श्रीपते
दारिद्र्यं विदुषां जगाम सहसा क्वापीति किं कथ्यताम् ।
यद्वृत्तादित आशु काञ्चनगिरिः कल्पद्रुमः कामधुक्
चिन्तारत्नमगान्निजार्पणभयात्तद्देव चित्रीयितम् ॥६॥

१०. क. प्रभो ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तं शङ्खं प्रथमे हिरण्यकशिपुं तुर्ये बलिं पञ्चमे
षष्ठे हैहयमष्टमे मुरमरिं लङ्कापतिं सप्तमे ।
एतान् वैरिवरानमीषु सकलान् जित्वावतारेषु भो
राजँस्त्वं समुपागतोऽसि दलितुं दारिद्र्यदैत्यं भुवि ।।७।।

श्रुत्वा त्वद्दानमुद्रामतिचपलतया प्रस्थितैरर्थिसार्थै
राजन्नुत्थापितोच्चैः पदतलनिहताद्धूलिरुर्वीतलाद् वा ।
सा गत्वा शीघ्रमूर्ध्वं भवदरिवनिताबालकार्तस्वरौघं
श्रुत्वात्यन्तं विदीर्णं स्थगयति पतदप्यन्तरालेऽन्तरिक्षम् ।।८।।

इन्द्रो नित्यं मरुत्वान् द्विजयुवतिरतः सर्वदाही हुताशः
कीनाशः कालरूपोऽमृतपतिरथ यो नैर्ऋतिः सोऽपि रक्षः ।
केशः पाशी ह्यरूपो मरुदथ धनदो बद्धमुष्टिः प्रसिद्धो
भर्गो भिक्षुः कथं ते नृप वहतु तुलां दिक्पतीनां समूहः ।।९।।*

राजँस्त्वत्कीर्तिचन्द्रे द्युतिजिततिमिरे प्रस्थिते पौर्णमासीं
कर्तुं सर्वत्र सर्वास्तिथय उरुभयात् प्रस्थिता क्वापि जग्मुः ।
तासामेकादशी सा त्रिपुरहरतिथिः कृष्णजन्माष्टमी वा
यावत्त्वद्वैरिगेहे वसतु मम गृहे द्वादशी प्रार्थये त्वाम् ।।१०।।

मामालोक्य प्रतापोज्ज्वलितदशदिशं शत्रुसार्थस्य लक्ष्मी-
रागत्यास्ते गृहे मे ध्रुवमिति कुरु मा गर्वमुर्वीपते हे !
संग्रामे त्वच्छरौघानसुहरणविधावुद्यतान् वीक्ष्य पातै-
र्दिक्प्रान्ताँस्तैः समं किं कथय न हि गता तावकीनाऽपि कीर्तिः ।।११+।।

कायव्यूहं विधातुं तव सकलशरत्कालशीतांशुशुद्धा
कीर्तिर्जानाति जाने बहुजननयनानन्ददाने समर्था ।

* इन्द्रो हुताशः कीनाशः नैर्ऋतः केशः (वरुणः) मरुत् धनपः भर्गश्च (शिवः) इत्यष्टौ दिक्पालाः ।

+ शत्रुसार्थस्य लक्ष्मीः तव प्रतापाकृष्टा सती तव गृहमागत्य ध्रुवं स्थिता इति, गर्वं मा कुरु, तावकीना कीर्तिरपि त्वच्छरपातैः सह दिक्प्रान्तान् गता, इत्यपि पश्य ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्मादेकाप्यनेकाश्रिततनुवदसावत्र लोके नराणां
तद्वल्लोकेऽमराणां वसति च सततं मन्दिरे पन्नगानाम् ॥१२॥

श्रीमान् छत्रपतिः प्रचण्डनिजदोर्दण्डद्वयीनिर्जिता-
रातिः सर्वधराधिवासिकविभिः संस्तूयमानोन्नतिः ।
राजाऽस्यां भुवि सांप्रतं विजयते श्रीविष्णुसूनुः कृती
गोविप्रावनकर्मणि स्वयशसा शृंगारिताऽऽशाऽकृतिः ॥१३॥

राजन् दिग्विजयं विधातुमखिलं त्वय्युद्यते सत्यमी
त्यक्त्वा यान्ति गृहं वनं प्रति भवद्द्वेष्या इदं नाद्भुतम् ।
यस्मात् त्वद्भयतो वृषापि करतो हित्वा धनुः खे ततो
भूयो गर्जति दम्भतो नरपते त्वत्तोऽभयं याचते ॥१४॥

राजन् श्रीविष्णुसिंहात्मजवर भवतो धावमानाः प्रतापाः
दग्ध्वा शत्रून् समस्तान् पपुरतितृषिता हन्त सर्वान् समुद्रान् ।
एतन्मध्ये प्रयातैर्भवदमलमहादानवारां प्रवाहै-
रासन्नुच्चैः रिपुस्त्रीनयनजलभरैः पूर्णगर्भाः पुनस्ते ॥१५॥

एतस्यां भुवि भूमिपा बहुधनाः श्रीकर्णभोजादिकाः
जातास्तेषु महीमहेन्द्र भवतः कस्यापि नो तुल्यता ।
यस्मात्तान् मिलिताः सिषेवुरपरान् राज्ञो बुधाः सर्वदा
ये च त्वां मिलिता न तेऽन्यनृपतीन् पश्यन्त्यपि श्रीबलात् ॥१६॥

नित्यं मङ्गलवान् गुरुद्युतिलसन्नग्रे सदा केतुमान्
कव्याधिक्यमितो बुधद्विजपतीन् संस्थापयन्नन्तिके ।
हस्तौदार्यधरः पुनर्वसुयुतो ज्येष्ठाश्रयो व्योमवत्
सर्वत्र स्थितिमान् भवानिव भवान् भूमीन्द्र भूमण्डले* ॥१७॥

उत्पन्ने सति विष्णुसिंहतनये राज्याज्जनोपद्रवाः
जग्मुस्तेषु हि यन्त्रकं भ्रमिरगाज्जाड्यं जलेष्वाविशत् ।

* मुद्रालङ्कारप्रयोगेण ग्रहनक्षत्रनामान्युदाहृतानि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दण्डः क्षेपणिकामिषाच्च समगान्नौकासु सेलोर्मिषाद्
बन्धो निम्नमहीषु तक्षणमिषात् शास्तिर्गता ग्रावसु ॥१८॥

सौन्दर्येण रतीश्वरो धिषणया वागीश्वरो वर्चसा
घर्मांशुर्यशसा हिमांशुरवनाधिक्येन ∵ कुन्तीसुतः ।
गाम्भीर्येण सरित्पतिर्वितरणैः कर्णादयो भूमिपा-
स्ते के सन्ति महीमहेन्द्र भवता ये श्रीमता नो जिताः ॥१९॥

मोक्तुं नेच्छति दाववह्निमनिशं शीतेन संपीडितो
व्याघ्राणां भयतो नयत्यतिघनै रात्रींस्तु कोलाहलैः ।
आम्रान्तर्गुटिकाः[11] खगास्यपतिता अत्ति क्षुधापीडितो
देवेत्थं भवतो वनानि परितो वैरिव्रजः सेवते ॥२०॥

धाराधावद्धयालिखुरखनितधरोद्धूतधूल्यां खरांशौ
निस्तेजस्त्वाद्धिमांशौ सति शितिसितवद्भव्रजे* जृम्भमाणे ।
राजन् संग्रामभूमौ तव निशितशरा वासरेऽपि त्रियामां
प्रायस्तन्वन्ति यस्माज्झटिति रिपुगणास्तत्र कुर्वन्ति निद्राम् ॥२१॥

आश्चर्यं प्रतिकूलभूपवनितानेत्रेषु वर्षाकर-
स्त्यागे कल्पमहीरुहो रिपुवनीदाहेषु दावा[नलः]× ।
उच्चैः कीर्तिसुधाकरस्य जनने क्षीरोधिरुर्वीपते
सोऽयं दक्षिणपाणिरत्र भवतो नानाविधो दृश्यते ॥२२॥

त्वद्वाहा इव नेत्रयोर्न हि चिरं लक्ष्या व्रजन्तो परं
द्वीपे द्राक् तव वैरिवद् विदधतो निस्वान् धनुर्दण्डवत् ।
वैधव्यं दधतां शिशुत्वसमयात् स्त्रीणां सतीनां[12] प्रभो
वक्षोजा इव भो भवन्ति लघवो हैमन्तिका वासराः ॥२३॥

∵ अवने रक्षणे धनुरावर्जने च ।

११. ख. गुडिका ।

* भव्रजे तारागणे—नक्षत्रं ऋक्षं भं तारा इत्यमरः ।

× ह्यतोऽग्रे षड्विंशतिपरितानि पद्यानि 'क' प्रतौ नोपलब्धान्यतः 'ख' प्रतेरवतारितानि

१२. ख. द्विषां ते इत्यपि पाठः प्रतेरायुषि टंकितः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नम्रीभूतं त्वदीये धनुरिदमचलानाथ संवीक्ष्य हस्ते
स्तब्धं चेषुं दिगन्ते गतमिति युधि ते वैरिणो मन्त्रयन्ते ।
नम्रीभूतानयं भूवलयपरिवृढो रक्षति क्षोणिपालान्
स्तब्धीभूतान् दिगन्तान्नयति तदधुना नम्रतैवोचिता नः ॥२४॥

इह भुवि जयसिंहे राजचन्द्रे हि रक्षां
विदधति सति वज्री भूरि निश्चिन्त आस्ते ।
धनुरिदमदसीयं वीक्ष्य सज्जं स्वकीयं
गुणविरहितमन्तर्व्योम्नि कृत्वा विधत्ते ॥२५॥

खड्गं ते विष्णुसूनो क्षितितिलकमणे काद्रवेयं विजाने
यस्मात्त्वद्वैरिणस्तं दलविलसदनान्निर्गतं वीक्ष्य सर्वे ।
केचिद्भूमौ पतन्ति त्वदमलचरणौ केऽपि वै द्यौ श्रयन्ति
क्षुद्रा अन्ये विशन्ति द्रुतमुरुविपिनान्योषधीर्भक्षयन्ति ॥२६॥

नित्यं कोशविलोदरे वसति या या च द्विषां सर्वदा
ग्रीवासु प्रविविश्य भक्षयति तान् प्राणादिपञ्चानिलान् ।
ये मन्त्रागमकोविदा नरपते तेषाञ्च या नो वशा
सेयं तेऽसिलतोरगी विजयते धाराम्बुहालाहला ॥२७॥

राजँस्त्वत्खेटपृष्ठं प्रतिभटपटलीहेतिभिः संगतं सत्
तासां भङ्गं चकार प्रतिदिनमथ तद्दृश्यते चातिवीर्यम् ।
तस्माच्छङ्केऽहमित्थं भवदिषुफलकैः शत्रुवक्षःस्थलस्थं
भित्त्वा दूरीकृतं यत् तदिह वसति भो दार्ढ्यमागत्य सर्वम् ॥२८॥

राजन्नुष्णीषमेतत्तव हरति दिवा[13] दीप्तिमृक्षान्वितायाँ-
स्तारैर्हेम्नो[14] युतं तद् वहति विधुमियं त्वन्मुखस्पर्द्धिनं सा ।
अस्माकं कोऽपराधः कथय नरपते तेन नो दृष्टिरेषा
गन्तुं नो दीयतेऽन्यान् प्रति हि निजगुणैः स्थापितेवाशु बद्धा ॥२९॥

---

१३. ख. दिवौ । १४. ख. तास्तैः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुक्ले चन्द्रकला यथाम्बरतले कृष्णे तथा तारका-
वल्यां ते मतयो यथा दिनमणेर्मध्ये यथा दीप्तयः ।
वर्षादौ सरितां यथाम्बुततयो भाद्रे यथा वल्लयो
वर्द्धन्ते तव राज्यवासिविदुषां नित्यं तथा सम्पदः ॥३०॥

उच्चैरेतस्य राज्ञः प्रतिभटपटलं वीक्ष्य चापं विशालं
कुर्वन् क्रूरं निनादं लघु विशति वनं नास्ति चित्रं ममेदम् ।
यस्मात्तत्राप्यशेषक्षितितिलकमणेरस्य संश्रुत्य नाम
क्रीडाकीरे स्वभावात्पठति परवनं ते भयाद्यान्ति तूर्णम् ॥३१॥

दारिद्र्याम्बुनिधेः प्रपारगमने नेच्छन्ति नावं जना
दारिद्र्यद्विषि जाग्रति त्वयि सति श्रीविष्णुसूनोऽधुना ।
उच्चस्थानगमेच्छवश्च सरणिं कांक्षन्ति नो साम्प्रतं
त्वत्पाणाववलम्बने सति गिरा बह्व्या कृतं निश्चितम् ॥३२॥

घण्टासङ्घघनारवैर्बधिरितप्राणिश्रुतौ मस्तके
सिन्दूरद्युतिभिर्भृते शितिरुचावुच्चेञ्जनाद्राविव ।
ब्रध्नालङ्कृतमूर्ध्नि धावति रणे राजन् गजे ते द्विषां
देशेऽपि क्षितिकम्पपांसुरुधिरासारा भवन्त्यद्भुतम् ॥३३॥

अंद्वाक्षेपैः* क्षताङ्गान् रथहयकरभान् पत्तिसङ्घाँश्च कुर्वन्
दुर्गद्वाराणि शालैः♏ सह परिदलयन् वज्रदन्तप्रहारैः ।
शुण्डाफूत्कारवातैररिकरिकरटे≧ दानमुद्वासयन् भो
राजन्नाजौ गजस्ते गिरिरिव तमसां गर्जते दानवर्षी ॥३४॥

यद्वेगस्य खगव्रजाः प्रतिदिशं निःसारभागा भ्रम-
न्त्युच्चैर्ये मरुतश्च यान्ति परितस्ते तद्विवर्ताः प्रभो ।
या चेतो गतिरस्ति सा तु चरणानेतस्य संसेवते
तद् भूमीन्द्र गजेन्द्ररत्नमधुना केनोपमेयं हि ते ॥३५॥

---

* 'अंदूः स्त्रियां स्यान्निगडे' इति मेदिनी ।

♏ शालैः प्राकारैः ।

≧ 'काकेभगण्डौ करटौ' इत्यमरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बैकुण्ठे गरुडो दिवि क्रतुभुजां स्तम्बेरमः पक्षिणो
मध्येव्योम महोर्मयो जलनिधेर्यद्वेगमुर्व्यामहो ।
अभ्यस्यन्ति परं तु नैति किमिदं चित्रं यतो लज्जितं
सच्चेतोऽप्यगुतां गतं रयजितो वातोऽप्यदृश्योऽभवत् ।।३६।।

गजारूढं राजन् गजपतिसमारूढहरिवद्
विभान्तं त्वां नार्यो मदनमिव जानन्ति सकलाः ।
कृतान्ताभं द्वेष्याः सुरतरुसमं चार्थिनिवहाः
प्रजास्तावन्नैको[१५]भवसि कथमेकोऽपि निखिलाः ।।३७।।

न श्वो यस्य दिशां विलङ्घनविधौ तेनाश्व इत्याख्यया
विख्यातो हयवर्य एष भवतो धर्मात्मनो वेशनात् ।
जातः पण्डित इत्यवैमि यदसौ पृथ्व्यां लयं प्राणिनो
यास्यन्त्यंघ्रितलेष्वतो हि भयतो व्योम्नि द्रुतं धावते ।।३८।।

पृथ्वीं पृथ्वीं क्षणेन भ्रमत इह महाचिन्तयाऽगुप्रमाणं
चेतोऽभूद्यस्य दृष्ट्वा रयमधिकमहो गन्धवाहोऽपि नूनम् ।
जातोऽदृश्योऽथ मूर्खो धरति गुणनिकां सागरो व्यर्थमेव
प्रायो विद्वान् हयस्ते दिवि बहु चलते गोपदस्पर्शभीत्या ।।३९।।

त्वां सर्वाङ्गसुलक्षणे कृतमणीहेमाननाभूषणे
वाहे 'वाह वा रे'* विलोक्य मनुजाः संशेरते भूपते !
किं वोच्चैःश्रवसि स्थितोऽयमचलां द्रष्टुं स्पृहावानिहा-
ऽयातो वासव एव वास्मदधिपो देवेन्द्रवत् क्रीडते ।।४०।।

सूत्रैर्हेमविनिर्मितैर्विरचितां पादैश्चतुर्भिर्धृतां
वंशेनोपरि शोभितां रुचिरया छत्रोपधानैर्युताम् ।
दोःपुटचास्तरणान्वितां पवनगैर्बाह्यान्तरैः पल्लिका-
मारूढो धनिकेप्सितां धनदवत्त्वं भासि भासांनिधे ! ।।४१।।

---

१५. ख. प्रजास्तातं नैको ।

* साधु साध्वित्यर्थे 'वाह वा रे' इति भाषायां यथावत् प्रयोगः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतस्मिन् समये नरेन्द्र कमठाकारा नृणां चेष्टते
छाया पादतलेषु भानुकिरणैस्तापादिवापां च सा ।
याति द्राग् हिमताऽपि निम्नविषये सा का हि यस्याः सुखं
मज्जन्तः कुतुकाद्विदन्ति शिशवो वारां विहारेष्वहो ।।४२।।%

केचिद्वारिणि खेलनं विदधते केचिच्च लीलावने
मोदन्ते वनिताभिरुत्सवपराः केचिच्च लीलाजिरे ।
कीडन्ते जलयन्त्रवक्त्रसलिलैः सर्वेऽपि मध्यंदिनं
त्वत्कीर्त्या विधुभीकृतार्ककिरणं राकानिशार्द्धं विदुः ।।४३।।

सुललितपदबन्धं [धैः] पण्डितेन्द्रास्तमेतं [तैः]
नृपवरजयसिंहं तोषयामासुरेवम् ।
ददुरथ बहुरम्या आशिषोऽस्मै परस्मै
नृपतिषु धनदानैस्तोषिता ब्राह्मणास्ते ।।४४।।

योऽज्ञानान्धतमोवृतेऽत्र जगति ज्ञानप्रदीपो महान्
पद्मो* निर्धनिनां चतुर्मुखमुखस्वर्वासिसिद्धिप्रदः ।
दूर्वाखाद्यसमर्पणेन जगतीराज्यं प्रदातुं क्षमः
स त्वां लड्डुकमण्डितोरुकरकः पायाद् गणानां पतिः ।।४५।।

ब्रह्माण्डं येन शुण्डानिचुरितमिव तत्ताण्डवे चाण्डिकेशे
नृत्याविष्टेन चक्रायुधमुखविबुधैः प्रार्थितेनाऽपि चक्रे ।
यस्माद्भूताऽधुनाऽपि द्यवि भगणनिभाद् भासते बुद्बुदाली
दद्याद् देवो मुदालीर्गणपतिरिह ते सर्वदातृत्वशाली[१६] ।।४६।।

शुण्डादण्डेन येनोद्गमितमगसुतावल्लभोत्संगभाजा
गङ्गाम्भस्तच्छिरोन्तर्गतमधिलसति व्योम्नि तारौघदम्भात् ।
शम्भोः सन्ध्यातिनृत्ये हरिदपि सकला जायतेऽतीवरक्ता
प्रोद्यत्सिन्दूरपूरैर्यदमलवपुषः पातु युष्मान् गणेशः ।।४७।।

% ख-प्रतौ पद्यमिदं ४२ संख्ययान्वितं, ४३ तमं पद्यं तु नोपलभ्यते । उभयत्र एतस्मिन्निति पद्यं केचिद्वारिणीति पद्येनानुसृतं वर्तते । * पद्म इति निधिविशेषः ।

१६. ख. सर्वदा नृत्यशाली ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सेवा यस्य निजे गृहे हृदि तु सा सा चोपविश्य स्मृतिः
कालं साऽपि न चेहते न हि च काप्यत्राऽस्ति निर्बन्धता ।
यत्तस्यास्तु फलं तदिन्द्रपतिभिः स्वर्वासिभिर्दुर्लभं
लभ्यं तच्च विनैव याचनमसौ त्वां पातु लक्ष्मीप्रभुः ।।४८।।

यत्कान्तिर्यमुनाकदम्बकुसुमे भृङ्गोपमा यन्मुखं
गोपीनां परमं सुखं समकरोद् वंशीरवैरञ्चितम् ।
यस्माद्विश्वमुदेति यत्र च लयं प्राप्नोति यो योगिनां
ध्येयं तत्त्वमयं भवन्तमवतु श्रीदेवकीनन्दनः ।।४९।।

यं दावे सर्वशैलास्त्रिभुवनसुखदं धेनुकं चारयन्तं
दृष्ट्वा प्रेमप्रवाहान् दधुरमृतझरव्याजतः सर्वतन्वाम् ।
त्यक्तग्रासा हरिण्योऽप्यतिमुदितहृदो वेणुमाकर्ण्य नद्यो-
ऽप्यासन् यस्यातिवेगा अपि विगतजवाः पातु युष्मान् स देवः ।।५०।।

यं नीलाम्बुदसन्निभं चपलभाभातुल्यकान्त्या श्रिया
श्रीवृन्दावनमेदिनीपरिसरे दृष्ट्वा मयूरीगणाः ।
नृत्यन्ति स्म समस्तयोगिनयनानन्दाश्रुभिर्भानुजा
वर्षावत्समभूत् सदा स भवते दद्यान्मुदो माधवः ।।५१।।

यद् गोपीनयनाञ्जनं मुनिजनस्वान्ते परं ब्रह्म यन्-
नन्दस्त्रीहृदि दुग्धपानसमये कस्तूरिकाभूषणम् ।
ब्रह्मेन्द्रादिककारणं व्रजवधूत्सङ्गेषु खेलत्परं
पायात्त्वां किमपीह तद् यदुकुले लीलावतीर्णं महः ।।५२।।

नानासूनुसमाकुले परभृतां तारारवैर्मञ्जुलै-
र्वल्लीकुञ्जविराजितावनितले मन्दानिलैः शीतले ।
वंशीशब्दविमोहिताखिलजने श्रीभाजि वृन्दावने
क्रीडन् राधिकया समं दिशतु ते सौख्यं हरिर्नन्दयन्[१७] ।।५३।।

---

१७. ख. नन्दने ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पद्मानन्दकरो जगत्तिमिरहृत् पाथोनिधौ स्वापकृत्
पाथोजातसदालसत्करतलश्चक्रप्रयोगे कृती ।
गोवृन्दं परिपालयन्नथ गदाघाते प्रवीणो महान्
विश्वस्मिन् कृतविक्रमो भवतु ते श्रीशर्मकारी हरिः ।।५४।।

यस्मिन्नभ्युदिते सति त्रिजगतीमालिन्यमालाहृति
ब्रह्माद्या अपि निर्जराः करपुटान् बद्ध्वा पठन्ति स्तुतीः ।
विश्वात्मा जगदेकलोचनमसौ ब्रह्माण्डदीपो महान्
पायात् त्वां निजभक्तसद्मसु महालक्ष्मीकरो भानुमान् ।।५५।।

पश्यन् त्रैलोक्यमेतत् सुरनरभुजगान् स्थापयन् स्वस्वकर्म-
ण्यायात्यारुह्य हैमं रथमतिजविनं सप्तनामाश्विनं यः ।
स त्वामत्युच्चतेजोमहिमहतमहाध्वान्तधारो विवस्वान्
पायान्मित्रोऽप्यमित्रो निजजनविपदां संविदां सम्प्रदाता ।।५६।।

यस्याः संस्मरणं मलौघशमनं यद्वीक्षणाकाङ्क्षणं
दुःखाधेर्मथनं यदङ्घ्रिनमनं सर्वारिविध्वंसनम् ।
यन्नाम्नां पठनं त्रिवर्गजननं यस्याः कृपालोचनं
मुक्तिः सा सततं भवन्तमवतु श्रीशम्भुमूर्तिः स्वयम् ।।५७।।

श्रीमज्जह्नुसुतातरङ्गकलिकामाला त्रिमौलिस्थला
सव्यांगे नियतं स्थिताऽद्रितनया गीतश्रुतौ[१८] सादरा ।
कर्पूरोज्ज्वलदेहदीप्तिविजितज्योत्स्नाचयाद् दक्षिणा-
मूर्तिस्त्वां प्रमथाधिपस्य सततं पायाज्जगन्मङ्गला ।।५८।।

काशीनाथसुतो विशुद्धमनसां लक्ष्मीप्रदो भैरवो
द्वेष्याणां जगताञ्च रक्षणकरो वर्णाश्रमानन्दकृत् ।
यो देवोऽत्र विशेषणादिभिरहो वर्णैर्विशिष्यो भवेत्
स त्वां रक्षतु पुत्रपौत्रगृहिणीभ्रात्रादियुक्तं सदा ।।५९।।

---

१८. ख. गीतिश्रुतौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्गेहे शम्भुपूजा भवति सुरतरुप्रापितै रत्नपुष्पैः
शेषोऽप्याकर्णयन्न स्मरति धृतधरां यत्सभागानवादान् ।
कर्कोटः कोटिलाभं वितरतु भगवान् यच्छिरोरत्नभासा
पाताले कृष्णपक्षो भुजगयुवतिभिर्ज्ञायते नो निशायाम् ॥६०॥

चक्षुः सावर्ण्यभाजो जगति मृगवरान् वेणि लावण्यराजो
नागान् वक्षोजतुल्यान् रथचरणखगान्⊖ मध्यसाम्यान् मृगेन्द्रान् ।
ऊर्वोः सादृश्ययोगात्कदलिवनमपि प्रत्यहं पावयन्ते
यस्यां स्नान्त्यो युवत्यो भुवि नरवर! सा जाह्नवी पातु युष्मान् ॥६१॥

श्रौतस्मार्तपुराणदृष्टसुकृते यत्प्रेम ते वर्तते
भक्तिं यच्च समामुमापतिरमापत्योः समालम्बसे ।
यद् विप्रांघ्रिसरोजपूजनजलैरार्द्रं गृहं जायते
तत्पुण्यं तव वर्द्धतामथ चिरञ्जीवित्वमाशास्महे ॥६२॥

एको गोत्रे प्रभवति पुमान् तस्य दृष्टान्तभूतं
तस्मादुच्चैरधिकमथवा प्रार्थयेऽहं भवन्तम् ।
आशीः काऽस्तां तव मम समस्ताशिषां यद्विधात्रा
वासस्थानं त्वमसि कलितो लोककल्याणकर्ता ॥६३॥

बाल्ये खेलनमेव मुक्तिरथ च श्री यौवने यौवनोद्-
द्रेकाच्चञ्चलचक्षुषां मृगदृशां संभोग एवास्ति सा ।
वृद्धत्वे जगदीश्वरस्य चरणद्वन्द्वस्मृतिः संस्मृता
मुक्तिस्तत्त्रितयान्वितस्य[१६] भवतः काशीर्मया दीयताम् ॥६४॥

गाम्भीर्यस्थितिनिर्मलत्वमहिमश्रीवाहिनीमण्डितो
मुक्ताकाञ्चनविद्रुमादिसहितो राजन् समुद्रो महान् ।
सत्यं किन्तु ममापि सन्तु भवतामाशीर्गिरां राशयो
नानाजीवसमाश्रयस्त्वमधुना भूया महाजीवनः ॥६५॥

⊖ चक्रवाकान् ।

१६. क. मुक्तिस्तन्नियतान्वितस्य ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दातृत्वमास्तां[२०] नृपते सदैव ते हस्ते[२१] गृहे सन्तु च मङ्गलानि ते ।
सौख्यं परं चेतसि वर्ततां हि ते, द्विषां समस्तं नञ्पूर्वमस्तु ते ॥६६॥

द्वीपं देव विलोक्य जाम्बवमिदं कालेऽत्र भानौ परं
द्वीपं वीक्षितुमन्तिमाचलगते म्लायन्ति हर्षन्त्यहो ।
पद्मिन्योऽपि तथा भवन्ति युगपत् कह्लारवत्योऽथवा
मित्रामित्रवियोगयोगसमये केषां न चेदं[२२] भवेत् ॥६७॥

राजन् सम्प्रति रात्रिजन्मसमये सर्वत्र दीपा इमे
राजन्ते स्खलितस्य पश्चिमगिरेर्भासामिवांशा रवेः ।
येषां दर्पणसुन्दरे प्रतिफलान्यभ्रान्तरे तारकाः
दृश्यन्ते तमसीव हेमशलभा धूमे स्फुलिंगा यथा ॥६८॥

ऐते किं वा प्रदीपाः किमु मनुबलतः% कौतुकात्स्वर्णकीटाः
स्थैर्यं केनापि नीताः किमु भुजगपतेर्वीक्षितुं राजशोभाम् ।
या तस्योर्ध्वं शिरःस्था मणय इति चिरं तर्क्यमाणस्य मेऽभूत्
सिद्धान्तोऽयं नृपेन्दुं परिचरितुमितास्तारकास्त्वां नभस्तः ॥६९॥

राजन् सम्प्रति संध्यया सह रवौ रंतुं क्वचिन्निर्गते
मित्रद्रोहितमो निहन्तुमुदयं धत्ते विधुः प्राङ्मुखे ।
गायन्ति भ्रमराङ्गनाः कुमुदिमीहर्षेषु चक्राङ्गना
ध्यायन्ति प्रियमन्तरा रसमयीं वेलामिमां विद्महे ॥७०॥

रम्यं चन्द्रं क्षयाङ्गं कथमिमसृजल्लोककर्तेति निद्रां
धातुर्दूरीविधातुं रविरुचिभिषजं दारुणं यः प्रसेव्य[२३] ।
निर्मायाङ्गं प्रपूर्णं[२४] निजममृतमयं विश्वतापं विनिघ्नन्
सोऽयं प्राच्यामुदेति प्रभुरुडुसदसां पश्यतां वन्द्यताञ्च ॥७१॥

---

२०. ख. आरोग्यमास्तां ।
२१. ख. देहे । २२. ख. न वेदं (न वा इदं) । % मन्त्रसामर्थ्यात् ।
२३. क. प्रसेक्ष्य । २४. क. निर्माल्यं गन्धपूर्णं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यो जात्या भुवि चित्तपावन इति ख्यातस्ततोपाख्यया
विख्यातः खलु रानडा इति जडाज्ञानापहानौ कृती ।
तस्य श्रीकविविश्वनाथविदुषो दोषोज्झितैषा कृतिः
कुर्याच्चेतसि सम्मदं वहुविधं संख्यावतां सम्प्रति ।।७२।।

इति श्रीचित्तपावनजातीयविश्वनाथभट्टपण्डितविरचिते श्रीरामविलासनामकाव्ये द्वितीयः सर्गः ।

तृतीयः सर्गः

स्थित्वा साँभरपत्तनेऽथ कतिचिद् राजा दिनानि द्विषां
देशानात्मवशान् विधाय बहुभिर्भूभर्तृभिः संगतः ।
आम्बेरीं सुरराजधामसदृशीं तां राजधानीं निजां
प्रत्यानन्दघनो जगाम हरिवत् सैन्यैः समस्तैर्वृतः ।।१।।

यत्सौधा गगनंगता सितरुचो नित्यं शिवेनार्चिता
यस्यां वेश्मनि वेश्मनि श्रुतिकथा विद्वज्जनानां मुखे ।
या वै सप्तपुरीतरापि परया कान्त्यास्ति ताभ्योऽधिका
यस्यां कूर्मकुलाप्तचारुजनुषां राज्ञां निवासः सदा ।।२।।

धाराशृङ्गैर्दिवसमखिलं खेलमानान् हि दृष्ट्वा
यत्प्रासादा अपि पुरजनान् प्राप्तविद्या निशान्ते ।
आदायैते शशिमणिशिलानिर्झराणां प्रणाली
धारायन्त्रैरुदकमभितो मुञ्चमाना रमन्ते ।।३।।

एतस्यां पुरि वेश्ममूर्द्धसु सदा ज्योच्छ्रीषु पौराङ्गना
आरुह्य क्षणदापतिं न हि परं कुर्वन्ति सर्वा अधः ।
किन्तु स्वैः कुचकुङ्कुमैः सुरभितं कृत्वा महीमण्डलं
व्योमापि स्फुरदिन्दुकोटिसकलं चन्द्राननाः कुर्वते ।।४।।

इह हि तलगृहेषु प्रेयसीभिः सहामी
बहु विदधति पुण्यं कर्म भूमीषु योग्यम् ।
निशि तदुचितभोगं स्वर्गयोग्यं[२५] च सर्वे
सदनशिरसि[२६] नित्यं नागरेन्द्राः भजन्ते ।।५।।

२५. ख. स्वर्गभोग्यं । २६. ख. सदनसरसि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नानापक्वान्ननानावटकतिलवटीफेणिकापर्पटाद्यै–
र्लेह्यैश्चोष्यैश्च पेयैरधिकरुचिरैराजिकै राजमानम् ।
नानाशाल्यन्नशाकैः कृतबहुकुतुकं शीतसद्गन्धतोयं
मध्ये मध्ये सुवार्तं नृपतिरथ ददौ भोजनं भूपतिभ्यः ।।६।।

दत्त्वा भोजनमंशुकादिभिरलं संतोष्य सर्वान्नृपान्
गन्तुं स्वान्निलयान् प्रति प्रभुरसावाज्ञापयामास तान् ।
इत्थं तेऽपि नृपं निगद्य विनयाद् राजन् वयं किङ्करा–
स्त्वं चास्माकमधीश्वरोऽसि मुदिता जग्मुर्भुजैरञ्चिताः ।।७।।

वेदव्यासधिया समानमतिना ब्रह्मश्रिया शालिना
श्रीरत्नाकरदीक्षितेन गुरुणा तं वाजपेयं मखम् ।
आंबेर्यां पुरि देवराजनगरीतुल्यप्रभायामसौ
राजा कारयति स्म वेदविहितं धर्मे परं प्रीतिमान् ।।८।।*

अथो विश्वभर्तुर्द्वितीये परार्द्धे
पदे वैष्णवे श्वेतवाराहकल्पे ।
मनोरन्तरे चारुवैवस्वतस्य
प्रपन्ने कलेरादिपादे युगस्य ।।९ ॏ।।

जनानां परं प्रीतिदे पुण्यजम्बू–
युते द्वीपवर्ये च खण्डे मनोज्ञे ।
शुभे भारते विन्ध्यनाम्नो हिमाद्रेः
प्रशस्तांतराले महापुण्यभूमौ ।।१०।।

सदा शान्तियुक्तेऽथ बौद्धावतारे
शके विक्रमार्कस्य राज्ञः पवित्रे ।
मनोहारके पञ्चषट्सप्तचन्द्रैः (१७६५)
शुभाङ्कैर्मिते हायने गच्छमाने ।।११।।

---

* ख. प्रतौ पद्यमिदं १४. सङ्ख्याङ्कितं वर्तते । ॏ ख. ८ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विलम्ब्याख्यसंवत्सरे दक्षिणस्यां
दिशायां स्थिते भास्करे शैशराख्ये ।
ऋतौ माघमासे शुभे शुक्लपक्षे
तिथौ पूर्णिमायाञ्च शुक्रान्वितायाम् ॥१२॥

दिनर्क्षे तु पुष्ये सति प्रीतियोगे
कुलीराख्यराशौ स्थिते यामिनीशे× ।
रवौ पंक्तिराशौ⁴ गते देवपूज्ये*
तुलायां स्थिते चेति पञ्चाङ्गशुद्धौ ॥१३॥

काश्यां धर्मपरायणो बुधवरः शाण्डिल्यगोत्रो महा-
शब्दोपाख्य इह प्रसिद्धविभवः श्रीदेवभट्टो द्विजः ।
मान्यः सर्वमहीभृतां विजयते श्रीरामसिंहार्चितो
वेदार्थस्य विचारकृत् प्रतिदिनं पुत्रादिभिः शोभितः ॥१४॥

यो वेदं समधीत्य शास्त्रधिषणः सम्पाद्य हेमार्जनं
कृत्वा पञ्चमखान् करोति विधिवद् गङ्गातटे प्रीतिमान् ।
नित्यं श्रीमदुमारमारमणयोरर्चाञ्च कुर्वन् समां
वेदव्यासपराशरादिवचसां तात्पर्यविज्ञानवान् ॥१५॥

पुत्रस्तस्य पुराणविद् दिनकरो ज्येष्ठो वरिष्ठो धिया
काश्यामुत्तरवाहिनीस्तवनकृन्नित्यं[२७] मनस्वी महान् ।
आस्ते पुत्रकलत्रमित्रसहितो विद्याधरो यत्सुतः
पूर्वं श्रीजयसिंहभूमिपतिना नाम्ना कुबेरः कृतः ॥१६॥

प्रभाकरो भास्करवत् प्रभावान्
नाम्ना द्वितीयस्तनयस्तदीयः ।
मीमांसकोऽध्यापनकृत् कुटुम्बी
करोति वासं मथुरानगर्याम् ॥१७॥

× कर्कस्थिते चन्द्रे । ⁴ मकरराशौ । * गुरौ तुलाराशौ स्थिते सति ।
२७. ख. सवनकृन्नित्यं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रातर्यो यमुनाजलान्तरगते विश्रान्तितीर्थे सदा
स्नात्वा भागवतं हि वाचयति तत् सार्थं विभोरग्रतः ।
सायं भारतमद्भुताद्भुतकथं यो वक्ति च प्रत्यहं
सर्वं पर्वणि पर्वणीक्षुरसवद् विद्वज्जनानां प्रियम् ॥१८॥

मीमांसाद्वयतर्कशास्त्रविलसद्वागापदेवः सुधीः
काश्यामास तदात्मजो बहुमतिः सौजन्यवारांनिधिः ।
श्रीनारायणदेव इत्यभिधया ख्यातो यदीयः सखा
संख्यावान् भुवि विद्यया विजयते मान्यो नृपाणां सदा ॥१९॥

पुत्रस्तस्यातिभव्यो* विमलमतिरथो शास्त्रवेत्ता तृतीयो
ज्योतिष्टोमस्य कर्ता नृपतिगुरुरहो उज्जयिन्यां नगर्याम् ।
आगत्याम्बेरिनाम्न्यां पुरि नृपवचनात् पुत्रपत्नीसमेतः
चक्रे रत्नाकरोऽयं मखमुरुविभवो दीक्षितो वाजपेयम्[२८] ॥२०॥

तत्राद्येऽहनि सूरिपूर्णसदने संकल्पवाक्योत्तरं
विघ्नानां परिशान्तये गणपतिं संपूज्य गन्धादिभिः ।
पश्चादत्र मखे विधाय विधिवत् सोमप्रवाकार्चनं
चक्रे षोडशऋत्विगादिवरणं∵ श्रीदेवभट्टात्मजः ॥२१॥

आसीद् भीमपुरो द्विजातिषु वरः सोमप्रवाको मखे
नाम्ना यः शिवराम इत्यभिहितः श्रेष्ठो महीमण्डले ।
अध्वर्युर्हरिकृष्णभट्टविबुधः कार्णाटकोऽभूद्द्विजः
श्रौतस्मार्तविधानदक्षधिषणो दान्तो दयावान् शुचिः ॥२२॥

महाशब्दोपनामास्मिन् शिवरामो महाक्रतौ ।
बभूव वैदिको विप्रः प्रस्थाता प्रीतिपूर्वकः ॥२३॥

---

* देवभट्टस्यपुत्रः ।

२८. क. चक्रे रत्नाकरस्तत् क्रममिह सकलं वाक्यसूत्रैर्वदामः ।

∵ ननु शुक्लयाजुषामार्त्विज्ये षोडशसंख्यकानां ऋत्विजां वरणं विहितम् । आपस्तम्बादिकृष्णयाजुषां तु सप्तदश ऋत्विजां वरणं क्रियते । सप्तदशतमस्तु ऋत्विक् सदस्यो भवति । (सं०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नेष्टा द्रोणोपनामात्र विश्वनाथो बभूव सः ।
यस्य बुद्धिं समालोक्य संतुष्टाः सर्वपण्डिताः ।।२४।।

आंबेकरो जगन्नाथो वाजपेये महामखे ।
उन्नेता समभूत् प्राज्ञो वेदवेदांगपारगः ।।२५।।

आत्रेयो जगरामोऽत्र सप्ततन्त्रो[२६] द्विजोत्तमः ।
आसीद् ब्रह्मा विशुद्धात्मा वेदाभ्यासे कृतश्रमः ।।२६।।

दशपुत्रोपनामास्मिन्नात्मारामो महामतिः ।
ब्राह्मणो ब्राह्मणाच्छंसी ऋत्विगासीन् मखे वरः ।।२७।।

रामडोहकरश्चाश्मिन् नलाभट्टेति वैदिकः ।
आग्नीध्रनामा संजातो निजकर्मणि दक्षिणः ।।२८।।

गङ्गाराम इहाथ दीक्षित उरुप्रज्ञो मखे सुन्दरः
श्रीरत्नाकरदीक्षितस्य तनयः पोता पवित्रोऽभवत् ।
नप्ता श्रीयुतदेवभट्टविदुषो यः स्वल्पवर्षोऽपि सन्
वर्षीयानिव शुद्धकण्ठमपठन् मन्त्रान् वरान् वैदिकान् ।।२९।।

लट्टूपनामा यो विप्रो नाम्ना गिरिधरः सुधीः ।
होता स जज्ञे यज्ञेऽस्मिन् वाजपेये महाबलः ।।३०।।

उपाख्यया च योऽमुष्यां रामडोहकरो भुवि ।
स मैत्रावरुणो यागे सुन्दरोऽभून्महीसुरः ।।३१।।

यः सौजन्यनिधिर्वार्ताकुशलो रम्यदर्शनः ।
स वीरेश्वरदेवोऽस्मिन्नच्छावाकोऽभवन् मखे ।।३२।।

पुत्रो यो भानुभट्टस्य पण्डितस्य मनोहरः ।
गोपीनाथोऽत्र संजातो ग्रावस्तोता विशारदः ।।३३।।

---

२६ ख. सप्ततन्ते । 'यज्ञः सवोऽध्वरो यागः सप्ततंतुर्मखः क्रतुः' इत्यमरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उद्गाता जयकृष्णोऽत्र त्रिवाडी गुर्जरोऽभवत् ।
सामगानेन यस्येन्द्रो मोदते त्रिदशैः सह ।।३४।।

प्रस्तोता वाजपेयेऽस्मिन् जातः केशवपाठकः ।
शाखायां वाजसेन्यां× य विख्यातो वेदपारगः ।।३५।।

सुब्रह्मण्यो जगन्नाथो गलेडा सवनेऽभवत् ।
बहुश्रुतेषु चारुश्रीः प्रयोगेषु विशारदः ।।३६।।

मीमांसको लोचितभूरिसूत्रो, यज्ञप्रियः कर्मणि सावधानः ।
द्रष्टोपपूर्वः※ खलु नागराजो, गदाधरोऽभूत् सवने बहुज्ञः ।।३७।।

चमसाध्वर्यवो जाता विप्रा एकादश क्रतौ ।
शुचयो वेदसम्पन्नाः प्रसन्नाननशालिनः ।।३८।।

कृत्वैवं वरणं महीसुमनसां पश्चाद् विधायार्चनां
वस्त्रालङ्कृतिहेमहारसहितां तां दीक्षणीयां♌ पुनः ।
इष्टिं दृष्टिविनोदिनीं बहुफलां श्रीदेवभट्टाङ्गजो
निर्वर्त्याखिलपातकौघशमनीं जग्राह दीक्षां गुरोः ।।३९।।

अध्वर्यौ हरिकृष्णनाम्नि सुमतौ तन्त्रोचितैर्वैदिकै-[३०]
र्मन्त्रैः श्रीयजमानराजगुरवे दीक्षां ददाने सति ।
प्राग्वंशे⊖ सुषमा तदा सुमहती सा काऽपि शच्याः पति-
र्यां दृष्ट्वा मुदितो बभूव भुवि तां को वर्णयेद् वा कविः ।।४०।।

मौञ्जीदण्डमृगाजिनानि च दधद् बिभ्रत् करे कङ्कणं
शृंगेनान्वितमञ्जिताक्षियुगलो रत्नाकरो दीक्षितः ।
तिस्रोऽतीत्य निशाश्चतुर्थदिवसे तां प्रायणीयामसौ⊿
कृत्वा कर्णसितां प्रदाय लघुगां जग्राह सोमं द्विजात् ।।४१।।

× सामशाखासु वाजसेनी ।
※ उपद्रष्टा । ♌ यजमानानद्वारा गुरोः दीक्षाग्रहणम् ।
३०. ख. तंत्रोचितैर्वैदिकैः । ⊖ यज्ञस्थले । ⊿ सोमक्रयार्थं विहिता इष्टिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धृत्वा तं शकटोपरि द्रुतमसावानीय यज्ञालये
विप्रैः साकमनन्तरञ्च कृतवानातिथ्यपूर्वेष्टिकाम्× ।
एवं पञ्चमषष्ठयोः समभवन्नक्तोः प्रवर्ग्याः⩽ शुभाः
सर्वाश्चोपसदो卐 बभूवुरमरस्वान्तेषु हर्षप्रदाः ।।४२।।

आग्नीषोमीययागे⩽ पशुविधिसुभगे देवतास्तृप्तिमापु--
र्वौषट्○शब्दान्तवह्निप्रहितघृतवपामुख्यहव्यैः समस्ताः ।
शस्त्रैर्होतुर्मुखात्तैर्बहिरभिनिसृतैः सामगानैश्च वक्त्राद्--
उद्गातुर्निःसृतैस्तैः समजनि विविधा कापि शोभा मखेऽस्मिन् ।।४३।।

या प्रातः सवने बभूव सुषमा या वाऽऽस मध्यंदिने
या सायं सवने च शस्त्रपठने याऽऽसीच्छ्रुतीनां प्रिये ।
या शून्यास्वभवत् ततोऽपि विपुला या साम्नि राथंतरे❋
सा शोभा खलु रामदेव्यलपने कोटिं परां सङ्गता ।।४४।।

एवं श्रौतविधानदक्षधिषणा वाराणसीब्राह्मणा
आर्त्विज्यं विदधुः सुकण्ठमधुरं मन्त्रान् पठन्तो मुखैः ।
शोभा काऽपि तथा बभूव सवने तस्मिन् यथा प्रागहो
दक्षस्यास मखे यथा च समभूद् धर्मात्मजस्याध्वरे ।।४५।।

गङ्गारामसुतान्वितोऽथ मुदितो रत्नाकरो दीक्षितो
यज्वा श्रीजयसिंहभूमिपतिना सार्धं तथाऽध्वर्युणा ।
चक्रेऽसौ बहुपुण्यनाम दधता वेदध्वनिं कुर्वता
कर्म स्यन्दन रोहणादिसुषमा तत्राऽस नानाविधा ।।४६।।

× क्रीतसोमस्य यज्ञशालायामानयनम् ।
⩽ प्रवर्ग्यो होमविशेषः, महावीर-पिनवन-रोहिणपात्रेषु पयस्संभरणम् ।
卐 होमविशेषः विष्णुसोमयोः कृते घृतार्पणम् ।
⩽ आग्नीषोमीयः पशुः दौर्ब्राह्मणत्वनिवृत्यर्थं समानतन्त्रेण क्रियते । यस्य च पिता पितामहश्च सोमपीथिनौ न स्यातां स दुर्ब्राह्मण इत्युच्यते । तद् दोषनिवारणार्थं योऽनुष्ठीयते स दौर्ब्राह्मणत्वनिवृत्यर्थः पशुः ।
○ स्वाहा श्रौषट् वौषट् वषट् स्वधा पञ्चैते देवेभ्यो हविर्दान विशेषे प्रयुज्यन्ते ।
❋ राथन्तरे सामभेदे । वृहत्. रथन्तरं, वैरूपं, वैराजं शाक्वं, रैवतमिति षट् सामानि पृष्ठानीत्युच्यन्ते । पृष्ठानां संग्रह इति पृष्ठ्य उच्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हस्ताभ्यां दश दिक्षु तत्र सुकृती श्रीवाजपेयी स्वयं
राजा श्रीजयसिंह एष च धनं यच्चिक्षिपे तद्ग्रहम् ।
कर्तुं तद् द्विजपुङ्गवाः परिकरान् बद्ध्वा प्रचेलुस्तदा
या लीला समभूत परस्परमिमां को वर्णितुं शक्नुयात् ॥४७॥

उत्तीर्याथ सुवर्णनिर्मितपदे दत्त्वा पदं दक्षिणं
सव्यं चापि हि पद्मकान्तिरुचिरं बस्ताजिने≈ न्यस्तवान् ।
आसन्द्यामुपविष्ट आशु गुरुणा हुत्वाऽभिषिक्तो बभौ
वेधोवत्कमलाकरस्य विदुषो विद्यावता सूनुना ॥४८॥

यज्ञान्तेऽवभृथाभिषेकमवनीपालेन कृत्वा समं
सर्वान् दक्षिणया वृतान् विहितया श्रीवाजपेयी द्विजान् ।
सन्तोष्याथ परान् गुणैः परतरान् सौस्नातिकान्% ब्राह्मणान्
मिष्टान्नैर्धनसम्पदां वितरणैरानन्दयामास सः ॥४९॥

श्रीरत्नाकरदीक्षितस्य परया श्रीवाजपेयोद्भवा
कीर्त्या व्याप्तमिदं बभूव भुवनं फुल्लं सिताम्भोरुहम् ।
यन्मध्ये जयसिंहभूपभुजयोः स्फारैः प्रतापैस्तदा[31]
दीप्ताङ्गारसमैः सुवर्णसदृशी किञ्जल्कशोभा कृता ॥५०॥

श्रीरत्नाकरदीक्षितोत्तमगुरोर्यागे समागामिनां
दारिद्र्यं जयसिंह एष विदुषां नीत्वा लयं प्रीतिमान् ।
पश्चाच्छ्रीजयमन्दिरोपरि निशि ज्योत्स्नासु योग्यासने
स्थित्वा श्रीकविविश्वनाथरचितान् श्लोकान् शृणोति स्म सः ॥५१॥

राजन्नैतद् विहायो विलसति वसुधा निर्मलं तत्किमेत-
च्छम्भोः शैले प्रभूतं दिशि दिशि प्रसृतं[32] काननं भाति धातुः ।
नो नक्षत्राणि किन्तु प्रतिनिशमुदयं यान्ति पुष्पाणि सन्ति
प्रातः श्रीशम्भुभक्तैरदितिदितिसुतैर्नीयमाना न्यसन्ति ॥५२॥

≈ 'बस्तच्छागलका अजेत्यमर': ।
% सुस्नातान् अवभृथसुस्नातान् ।
३१. ख. ततो । ३२. ख. विसृतं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राजन्नैतन्नभस्तत्किमिदमतिततं देवपर्यङ्कमूहे
नीलं रूपं न चेदं मृगमदमलिनं वस्त्रमस्योर्ध्वमास्ते ।
एतास्तारा न कल्पद्रुमजसुमनसश्चन्द्रमा नैष शेषो
नासावङ्कोऽस्ति तस्मिन् वलयिनि शयिता विष्णुमूर्तिर्विभाति ।।५३।।

नैतद् व्योमास्ति किन्तु स्फुरति शितिशिलानिर्मितं सज्जनानां
संवेष्टुं सृष्टिकर्तृकृतमिदमजिरं श्रीहरिध्यानभाजाम् ।
नासौ ग्लौरालवालं शशिमणिरचितं नायमङ्कोऽस्ति वृन्दा
नैतास्तराः समन्तात् सुमनस उचिता दिग्वधूभिः प्रयुक्ताः[33] ।।५४।।

खं नैतन्न च भान्यमूनि विबुधैर्नीलाभपत्रे गुणा
अम्बाया लिखिता अदो लिपिरियं बिन्दुस्वरूपोत्तमा ।
आनन्त्याल्लिखनासहिष्णुभिरियं मुद्रा कृता नो विधु-
र्नाकोऽसाविह वर्णमध्यविलसत् पत्रस्थितो नीलिमा ।।५५।।

नेदं विष्णुपदं प्रभो दिविषदामाधारभूमेरधो-
भागोऽयं न च भान्यमूनि भवतो राज्यश्रियं सुश्रियम् ।
पूर्णानन्दमहो गवाक्षविवरैः संपश्यतां निर्जरी-
वृन्दानां वदनानि भान्ति नृपते किं वा बहु ब्रूमहे ।।५६।।

राजँस्त्रैलोक्यमेतन्नभवति किमु तद्विश्वभर्तुर्गृहिण्याः
क्रीडासद्मास्ति यस्मिन् दधिमधुघृतवाङ्[34]क्षीरकुण्डाः समुद्राः ।
लीलास्थानानि सर्वा गिरिवनसरितः शालभञ्ज्योऽत्र जीवा
हेम्नः पात्राणि नानाविधवसुधृतये तारकास्तर्कयामः ।।५७।।

आकाशो न भवत्ययं भगवति क्रीडाङ्गणं भाति ते
नक्षत्राणि न सन्त्यमूनि गलिता मुक्तास्ततो मौक्तिकाः ।
ज्योत्स्नेयं न हि तेऽम्ब ! दिक्षु वितता हास्यान्वितास्यप्रभा
चन्द्रो न भ्रमति प्रसक्तमधुपं लीलारविन्दं तव ।।५८।।

---

३३. प्रमुक्ता इति सुष्ठुपाठो भवेत् ।

३४. ख. दधिमधुघृतवाः । 'आपः स्त्री भूम्निवार्वारी' त्यमरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विधोर्नेदं बिम्बं लसदमृतकुण्डं शुभमिदं
कलङ्को नैवायं रविकिरणतप्तो गजपतिः ।
इदं तारावृन्दं न भवति करोत्क्षिप्तमखिलं
प्रफुल्लं सौवर्णं सरसिजवनं वै विलसति ।।५९।।

दृष्ट्वा शीतलदीधतौ कुमुदिनीबन्धौ कलानांनिधौ
नीलं रूपमसौ कलङ्क इति मा मुग्धानने निश्चिनु ।
सुप्तायाः प्रियवक्षसि श्रममपाकर्तुं रताधिक्यजं
रोहिण्या गतबन्धनो निधुवने धम्मिल्लभारोऽस्त्ययम् ।।६०।।

किं नक्षत्राणि किं वा गगनपरिसरे सन्ति पुष्पाणि किं वा
धावत्सूर्याश्वपादावट×गलितसुधायाः सुधामण्डलानि ।
एताँस्तर्कान् विलुम्पन्नहमिति नृपते वेद्मि देवैर्वितानं
ज्ञात्वा त्वां विष्णुरूपं भुवि मणिखचितं नीलवर्णं निबद्धम् ।।६१।।

राजँस्त्वां प्रति याच्यतेऽञ्जलिपुटं बद्ध्वा मयेदं निजे
मूर्ध्नि त्वं कुरु सज्जनान् बहुधनान् मा दुर्जनान् जातुचित् ।
यस्मात्तैः कुजवत् प्रसारितकरे मित्रे सति त्यज्यते
कोशश्रीरपरस्तु लाञ्छनिसखैर्नो रक्तगन्ध्यैरिव ।।६२।।

बीजं यस्य रमा शिफास्तु# निगमा यस्यालवालं धरा
बारिण्यम्बुधयो दिशोऽथ विटपाः स्तम्बेरमाः△ कोरकाः ।
मुक्तादीनि फलान्यतीव निपुणा यस्मिन् द्विजाः पक्षिणः
क्रीडन्ते नरदेव ते विजयते सद्दानकल्पद्रुमः ।।६३।।

गङ्गाऽगण्यप्रवाहा सुरगजभुजगाधीशचन्द्रास्तु तस्या
नक्रा नालस्तु दुग्धाम्बुधिरथ शिवयोः शैल उच्छ्वास एकः ।
गोपीमृद्भृत्तु तस्याः शशिबिसकुमुदं फेन एवास्ति यस्या–
स्तारास्फाराः पृषत्का जगति जयति ते कीर्तिवाहिन्युदारा ।।६४।।

× गर्तोऽवटे ककुंदरे इति हैमः ।
'शाखा शाले शिफा जटे' त्यमरः । △ दिग्गजाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रक्षा पार्थिववस्तुनोऽनलवशाद्वाः संगमात् कर्द्दमो
नागस्ताडनयोगतः क्षितिपते संजायते दृश्यते ।
त्वद्वैरिव्रजयोषितां तु हृदयं शोकाग्निनेत्रोदका-
नल्पाघातयुतं तथापि विकृतिं नो याति चित्रं महत्* ।।६५।।

सिंहस्तिष्ठति यत्र तत्र न भयं कस्यापि दन्त्युद्भवं
लोकानामिति भाषितं तदखिलं मिथ्यैव जानाम्यहम् ।
यस्मादुत्तमधामपुञ्जवसतौ भूपालसिंहे क्षितौ
त्वय्यस्यां सति पीडयत्यहह मा दारिद्र्यदन्ति भृशम् ।।६६।।

प्रत्यक्षादिकसत्प्रमाणनिपुणप्रज्ञोऽसि वै वेदवत्
स्वातन्त्र्यञ्च बिभर्षि भासयसि वा कीर्त्या च लोकत्रयम् ।
नित्यं सर्वजनस्य तिष्ठसि हृदि श्रीरामवत् तत्कथं
नो जानासि विशाललोचन विभो मद्गेहवृत्तं प्रभो ।।६७।।

मृद्भाण्डानि ममालये प्रतिनिशं रोहन्ति चुल्हीषु+ भो
एकस्मिन् वनकन्दिका≧ वनभवा भाजापरस्मिंस्तथा ।
शेषे शालिवितूषकस्य फलकाः सर्वं तु सेटद्वयं*
भोक्तारो वयमष्ट भो नरपते मग्नोऽस्मि दुःखार्णवे ।।६८।।

अनश्विनि पुनर्वसुद्युति वियुक्तमुद्यच्छ्रुति-
प्रहीनमनघं मनागपि न चित्रितं कुत्रचित् ।
इदं हि बहुकौतुकं भुवि नरेन्द्र ते विद्विषां
बभूव सकलं पुरं झटिति शून्यमेवापरम् ।।६९।।

---

* क्षितिपते ! पार्थिववस्तुनः अनलवशाद् रक्षा संजायते, वाः संगमात् जलयोगात् कर्दमः संजायते, ताडनयोगतश्च नागः (चूर्णं) संजायते इति दृश्यते । शोकाग्नि नेत्रोदकानल्पाघातयुतं त्वद्वैरिव्रजयोषितां हृदयं तु तथापि विकृतिं नो याति इति महत् चित्रम् । इत्यन्वयः ।

+ 'अश्मन्तमुद्घानमधिश्रयणि चुल्लिरन्तिका' इत्यमरः; 'सिगडी' ति भाषायाम् ।

≧ वक्रयष्टिः (Monier Williams' Dictionary.)

* मात्राविशेषः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भो भो कान्त ! क्षणमुपविश क्षुत्पिपासाभ्रमिष्ठा
मार्गं नैक्षे मम बत पदे कण्टकाः संप्रविष्टाः ।
हा किं वीक्ष्य भ्रमितजनकेनाहमेतस्य हस्ते
दत्ता राजन् त्वदरिवनिता रोदितीत्थं वनान्ते ।।७०।।

मात्राऽहं जनिकाल एव किमहो नो दुर्भगा मारिता
तातेनाप्यविवाहितैव सदने कस्मान्न वा स्थापिता ।
मध्यस्थस्य वधूः कदा नु विधवा भूयादहं याचिता
येनास्मै कुवराय रोदिति वने त्वद्वैरिणामङ्गना ।।७१।।

अनेकपञ्चाननपूर्णगर्भं,, विभूतिसङ्घैकगृहं ग्रहाकुलम्% ।
धात्रीवरं भैरवमूर्तियुक्तं, जातं तवारातिगृहं शिवालयम् ।।७२।।

असंख्यऋक्षावलिसंकुलान्तरं, मृगान्वितं सोमविशेषभूषितम्× ।
राजन् सदा मङ्गलवत्खगाश्रितं, तव द्विषां शून्यमभूत्पुरं परम् ।।७३।।

मन्त्रार्थवादावथ नामधेयं, फलप्रदाने विधिरिच्छति त्रयम् ।
त्वयैकमप्याश्रियते न दात्रा, तस्मान्महाँस्त्वं भुवि मन्यते मया ।।७४।।

कार्यं गुणान् कारणनित्यसंस्थितान्, धत्ते य एवं पुरुषः प्रभाषते ।
पृच्छामि तं काऽत्र गतिर्यमस्वसा, घर्मांशुजा यच्छिशिरानुभूयते ।।७५।।

राजँस्त्वद्रिपुभिः श्रुतं न हि कथं तत् कर्म कोदण्डिना
सङ्ग्रामे यदकारि वैरिषु शरैः क्रूरैः पृथासूनुना ।
यत् तस्मादपि किञ्चिदुद्भटभुजस्तम्भेन सार्द्धं त्वया
मूर्खास्ते प्रलगन्ति वैरिगहनप्रध्वंसदावाग्निना ।।७६।।

मण्डूकप्लुतिमेत्य पाणिनिमतां संवीक्ष्य सद्वृत्ततां
येष्वाह्लादकतागुणो जलनिधे रत्नाकरादागतः ।
तेषां के न भुवि स्पृहां विदधते मुक्ताफलानां जना
येषां श्री नृपयोषितोऽपि हृदये वाञ्छन्ति नित्यं गुणान् ।।७७।।

% ग्रहाकुलं पिशाचाकुलं, "सूर्यादौ पूतनादौ" चेति विश्वः ।
× वायुपूरितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वां हित्वा कमिवान्यभूरुहमहं गच्छामि कल्पद्रुम !
त्वत्पत्रादिभिरत्र नाकसदसां वाजीगजा धेनवः ।
जीवन्ति त्वमिहासि पुण्यवसतिः सत्सम्पदां सागरो
नद्योऽन्ये वनशाखिनो भुवि भवान् धन्यो रसालो महान् ।।७८।।

पाली लालयति द्रुमान् बहुविधानारामभूमीषु या-
नाशास्ते च समानदृष्टि सकलाँस्तान् वीक्ष्यमाणः सदा ।
तेषां ये कुसुमैः फलैरुपगतानानन्दयन्ति द्विजान्
छायाभिश्च त एव निर्मलकथा धन्या भवन्तो यथा ।।७९।।

आरामाधिपते ममास्ति भवते विज्ञप्तिरेषा त्वया
नित्यं पुत्रवदेव चम्पकतरुः संसिच्य सम्पाल्यताम् ।
यस्माद्यौवनसंगतोऽयमखिलानग्रे द्रुमः सज्जनान्
कर्ता तृप्तिमतः स्वपुष्पजनितैर्लोकोत्तरैः सौरभैः ।।८०।।

मद्वारि प्रतिगृह्य गर्जसि नभोमध्ये विधाय स्थितिं
लज्जा चेतसि जायते तव कथं नो वेति पृच्छाकरम् ।
मेघो वारिनिधिं जगाद मम किं जानासि नेमं गुणं
क्षारं ते प्रतिगृह्य सागर पयो वर्षामि कृत्वाऽमृतम् ।।८१।।

मार्तण्डोद्दण्डकोऽस्त्रैर्दवदहनसमैस्तापिताङ्गान् समस्तै-
स्तृष्यच्छुष्यन्मुखाँस्तान् स्मरतु स न तु वा चातकान् वारिवाहः ।
ते तु प्राह्णे पराह्णे स्मरणमभिनयन्त्येव तस्य स्वचित्ते
सर्वे जीवातुरेषां परिहसविधिना निर्मितोऽस्ति त्रिलोक्याम्* ।।८२।।

श्रीमन् मानसराजहंस वचनं संश्रूयतां यद् वयं
त्वां हित्वाऽऽन्यसरांसि जग्मिम वरं श्रीसद्म पद्माकरम् ।
तज्जातापरितोषमात्महृदये मा स्थापय क्ष्मापते !
स्याज्ज्ञानं कथमन्यथा त्वमधिकस्तेभ्योऽसि नो निर्भरम् ।।८३।।

---

* दानिनं वारिवाहं प्रति कस्यचिच्छुष्यन्मुखस्याशार्थिनश्चातकस्योक्तिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भो भो केतकि तावकीनकुसुमं धत्ते न भस्मप्रियो
देवो मूर्धनि तेन मा कुरु निजे चित्ते विषादोदयम् ।
एकं तं परिवर्ज्य जीर्णपुरुषं के के न वा निर्जरा–
स्त्वत्पुष्पं सुरभि श्रयन्ति सततं सन्तोषसम्पादकम् ॥८४॥

आशाश्यं किमु वाम्बुवाहनिवहै रत्नाकरस्याम्बुधे–
र्यद्रत्नैर्विबुधाङ्गना निजतनौ भूषाश्रियं तन्वते ।
तस्मिन् पूर्णमथापि जीवनमहो आशासनीयं हि चेत्
तत्त्वं तस्य विभूतयो निजमुखस्थित्यर्थमाशासते ॥८५॥

कति कति न हि भूमौ पक्षिणः सन्ति किन्तु
क्षितिप सुकृतमेतैर्लट्वकैरेव% पूर्वम् ।
कृतमिह यदि नैवं तत् कथं वा तवाग्रे
निजगुणमहिमानं दर्शयेयुस्त एते ॥८६॥

जगत्यां श्रीमत्यां विविधनगवत्यां स सुकृती
द्रुमः कोऽपि श्रीमान् जयति रससंतर्पितकृती ।
जगद् यच्छायायां वसति सततं सोऽपि नृपतिः
क्षणं यस्यच्छायां श्रयति कुतुकावेशितमतिः ॥८७॥

गङ्गातीरकृतालयं प्रियवचो वक्तारमेतं बकं
त्वं मा विश्वस यादसांगण कदाप्येषोऽस्ति दुष्टोऽण्डजः ।
त्वं शृण्वस्य बकाधमस्य चरितं स्फारं प्रिये वच्म्यहं[३५]
विश्वासाय भवादृशां च निभृतं भुक्तेति केहागतम् ॥८८॥

धर्मात्मँस्त्वमिमं हि वायसशिशुं संवीक्ष्य वर्णं समं
मा संस्थापय मन्दिरे शुककपोताद्ये पिकस्य भ्रमात् ।
सोऽयं यावदजातपक्षयुगलस्तावत् त्वदीयालये
स्थास्यत्यूर्ध्वमितो गमिष्यति सखे हत्वा कपोतान् शुकान् ॥८९॥

% 'लट्वा करजभेदे स्यात् फले वाद्ये खगान्तर' इति मेदिनी ।

३५. ख. वक्त्ययं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रे रे शूकर वीथिकागतमलस्निग्धाङ्गभेकैर्वृते
स्थित्वा खाततटे विनिन्दसि गजान् लज्जा कथं नास्ति ते ।
उच्चञ्चन्नलिनीसरिच्छतघने संक्रीडतां कानने
मूर्ख त्वं करिणां पिकालिरुचिरे चित्तेऽपि नायासि रे ! ॥९०॥

कश्चित् पान्थस्तृषार्तः पथि तपनऋतौ गच्छमानोऽन्यपान्थं
पप्रच्छ श्रूयमाणो वद पथिक कुतो जह्नुकन्याप्रवाहः ।
तेनासौ शीघ्रमेव प्रचलितुमनसा विश्वनाथेन वाचा
सूच्यग्रे कूपषट्कं तदुपरि नगरी तत्र गङ्गाप्रवाहः ॥९१॥

कोकौ ग्लौ द्युतिसंशयं वनगतिं वैरीभ्रमं भानुमान्
दस्रौ⊖ कान्तिमदा समात्मचरितं वर्णस्तुतिं ते बुधाः ।
दृष्ट्वा कीर्तिधनुः प्रतापरुचिभी प्रज्ञाविलासान् प्रभो
कुर्वाते कुरुते करोति कुरुतः कुर्वन्ति कुर्वन्ति च ॥९२॥

प्रागासं नगरेषु तत्र तरुणीगोभिर्जितोऽगां वनं*
भिल्लेभ्यो भयतस्ततो विधुमयामत्रापि राहोर्भयम् ।
हा धातः करवाण्यहं किमधुनेत्यास्यं विधायाम्बरे
शृंगाग्रादपतन्मृगस्य रुदतो वाष्पं महीमण्डले ॥९३॥

जीव त्वं शरदां शतं धर खगान् भूयाः परं विक्रमी
कोऽप्यस्माकमिहाभवन्न विरहं हर्तुं निशायां क्षमी ।
सोऽयं नो भवता हृतोऽस्ति तदहो त्वं वेधसोऽप्युच्चकै-
र्बंदिस्था अपि पक्षिणो विदधते व्याधस्य चित्रां स्तुतिम् ॥९४॥

को ज्ञानेन विना भवेद् भुवि पुमान् चक्षुः करोतीह किं
कस्मिन् भोजनमेनसे रघुपती राज्यं कथं भुक्तवान् ।

⊖ दस्रावाश्विनेयौ च तावुभावित्यमरः ।
प्रभो ते कीर्तिधनुः दृष्ट्वा प्रतापरुचिभी ते प्रज्ञाविलासान् कुर्वन्ति. कोकौ द्युतिसंशयं कुर्वाते. ग्लौ (चन्द्रमाः) वनगतिं कुरुते भानुमान् वैरीभ्रमं करोति, दस्रौ कान्तिमदा समात्मचरितं कुरुतः, बुधाः वर्णस्तुतिं कुर्वन्ति इत्यन्वयः ॥

* युवतिजननयनैर्जितो भूत्वा वनमगाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किं दीप्तं ग्रहमण्डलेषु बहु का मिथ्याऽत्र लोकेऽस्ति वाग्
अन्धः पश्यति मध्यरात्रिसमये पूर्णं रवेर्मण्डलम् ॥९५॥

धनुः पौष्पं कोटौ स्थितमधुपमादाय मदनो
वरः पारावारे कृतवसति मैनाककुहरे ।
यदागात् तत्रत्यान् वशयितुमिदं चाजनि तदा
धनुः शृंगे भृङ्गस्तदुपरि गिरिस्तत्र जलधिः ॥९६॥

धनुर्ज्या कुत्रास्ते विविधरसभोक्ता च भुवि क-
स्तदूर्ध्वं यस्यार्थः पदमिह किमुच्चैरपि च कः ।
चलेत्तं किं वास्मिन् जगति बहु को वा मणिनिधि-
र्धनुः शृंगे भृङ्गस्तदुपरि गिरिस्तत्र जलधिः ॥९७॥*

तव पितुः सदने बहवो नृपाः, परिसमीयुरनन्तबलाधिपाः ।
नमयितुं न हि शेकुरमी त्वहं, शशकशृंगमयं कठिनं धनुः≈ ॥९८॥

धर्मे मनो यस्य रतं न पुंसि, योग्यो न तस्मिन् कमलानिवासः ।
इत्थं मया निश्चितमात्मनीव, सिन्दूरबिन्दुर्विधवाललाटे ॥९९॥

करधृतमिह यन्त्रं किं करोति स्त्रियाऽस्मिन्
जगति च निशि कस्मिन् भाति नक्षत्रलोकः ।
हरति सकलदुःखं कोऽर्चितः सन् गृहे वा
भ्रमति गगनमध्ये दक्षिणावर्तशङ्खः ॥१००॥

---

* प्रश्नः	उत्तरम्
धनुर्ज्या कुत्र आस्ते	धनुः शृङ्गे
विविधरसभोक्ता च भुवि कः	भृङ्गः
तदूर्ध्वं यस्य अर्थः तत् पदं इह किं	तदुपरि
उच्चैः अपि च कः	गिरिः
वा चलेत् तं किं	तत्र
अस्मिन् जगति कः वा मणिनिधिः	जलधिः

≈ अहं तु शृंगमयं कठिनं धनुः नमयितुं शशक इत्याशयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न भवति विधुरङ्के नाङ्कितोऽयं समुद्रा-
दुपरि सह पयोदैरागतो वीक्षितुं गाम् ।
सुरयुवतिभिरब्जैरर्चितो मेचकाभै-
र्भ्रमति गगनमध्ये दक्षिणावर्तशङ्खः ।।१०१।।

एकाक्षरं किं खगवाचि बालकैरभ्यस्यते का व्यवहारलोलुपैः ।
का लोकपालैर्ध्रियतेऽन्यवाचिता कुत्रास्ति विद्ध्युत्तरमत्रसूत्रतः।।१०२।।*

असाधारणं कारणं कर्षणे किं
विवाहादिके मङ्गले के च पूज्याः ।
स्त्रियः किं तथाऽवश्यकं भर्तुरस्ति
त्वमेतस्य विद्ध्युत्तरं सूत्ररूपम् ।।१०३।।×

भो साधो कुत आगतोऽसि शृणु भो भिक्षो भवद्ग्रामतो
दृष्टं तत्र किमद्भुतं भगवता देशा नदीमातृकाः ।
त्वद्द्वारे स्थितया तयाऽप्यबलया नम्रास्यया निर्मिता
नेत्राम्भोभिरभूत् सुभिक्ष्यमधुना त्वं याहि देशान्निजान् ।।१०४।।

मद्ग्रामागतविप्र मद्गृहकथां त्वं ब्रूहि जानासि चेत्
पान्थाकर्णय तापपङ्कभयतो नाहं गतो वेश्म ते ।
त्वत्पत्न्या खलु तत्र वक्त्रपवनैरूष्मैश्च नेत्राम्बुभि-
र्हेमन्तेऽप्यनिवारितौ सममहो आषाढभाद्रौ कृतौ ।।१०५।।

राजन् प्रोषितभर्तृका इव समाकर्ण्य प्रियस्यागमं
प्राचीं वीक्ष्य भवन्ति सम्प्रति सरोजिन्यः प्रसन्नाननाः ।

---

* प्रश्नः	उत्तरम्
एकाक्षरं खगवाचि किं	वि
व्यवहारलोलुपैर्बालकैः किमभ्यस्यते	धीः
लोकपालैः का ध्रियते	उत्तरा दिक्
कुत्रान्यवाचिता का	अत्र
आद्यपंक्तित्रयस्योत्तरं	विद्ध्युत्तस्त्ररमत्र इति सूत्रतो विद्धि ।

× सूत्ररूपेण स्त्रिय इति विद्धि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्प्रोष्यत्पतिका इवाथ च कुमुद्वत्योऽपि विच्छायतां
यान्ति प्रेत्य दिशं परां त्वमधुना प्रातः समुज्जृम्भते ॥१०६॥

राजन् सम्प्रति सर्वतो गुणनिकां संकुर्वतां वैदिक-
श्रेष्ठानां वदनेषु वेदनिगदाः श्रूयन्त उच्चैस्तराम् ।
किं चास्मिन् समये भवन्ति मलिना दीपास्त एतेऽपि यान्
धृत्वाग्रे श्रुतचिन्तनां बुधसुताः कुर्वन्ति भूयस्तराम् ॥१०७॥

त्वं मां हित्वा स्वकान्तां भवदुदपरतां वारुणीं नाशदां ता-
मार्चिर्निःसीमवत् तत्कथमपघृण रे यासि मामेव भूयः ।
एवं धिक्कृत्य लाक्षारुणचरणसमुत्सारितो रञ्जिताङ्गः
प्रायः प्राच्या भयेन द्युतिरहितवपुर्दृश्यते प्रातरर्कः ॥१०८॥

चक्राणां विप्रयोगं परिहरति दिशामास्यमाविष्करोति
श्रौतस्मार्ते विधाने रचयति नलिनी मुद्रणं संवृणोति ।
भृङ्गानां बन्धमुक्तिं विदधति सहसा गोसहस्रं तनोति
स्वच्छास्वच्छं विवक्ति क्षणमयमुदयं संगतः सप्तसप्तिः ॥१०९॥

राजा श्रीजयसिंह एष कविताभावार्थविच्छास्त्रवान्
श्रुत्वा प्राप मुदं परां हृदि निजे श्लोकान् मनोज्ञानथ ।
शृङ्गारश्रवणोत्सुकोऽपि सुषमामाकर्ण्य वैभातिकीं[३६]
कृत्वा स्नानविधिं जगाम विबुधानभ्यर्चितुं मन्दिरे ॥११०॥

यो जात्या भुवि चित्तपावन इति ख्यातस्तथोपाख्यया
विख्यातः खलु रानडा इति जडाज्ञानापहानौ कृती ।
तस्य श्रीकविविश्वनाथविदुषो दोषोज्झितैषा कृतिः
कुर्याच्चेतसि संमदं बहुविधं संख्यावतां सम्प्रति ॥१११॥

इति श्रीचित्तपावनजातीयश्रीकाशीनिवासिरानड्योपनामककविविश्वनाथभट्ट-पण्डितविरचिते श्रीरामविलासनामकाव्ये तृतीयः सर्गः ॥३॥

---

३६. प्राभातिकीं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्थः सर्गः

सत्यं लोकं विधात्रे हिमरुचिवपुषे चन्द्रलोकं सवित्रे
सौरं देवाय लोकं निजभजनकृते जिष्णवे स्वर्गराज्यम् ।
वैकुण्ठे योऽतिभक्त्या मुदित इह ददौ विष्णवे सोऽत्र किं वा
नो यच्छेत् सेवितः सन् त्रिभुवनसुखदः पार्वतीप्राणनाथः ।।१।।

यो निर्गुणोऽपि समभूत् सगुणो यदीयात्
सङ्गात् पुमान् विधिहरीश्वरनाम लेभे ।
पावीरवी⩽ जलधिजा गिरिकन्यका या
सा सुन्दरी दिशतु मङ्गलमादिमाया ।।२।।

एकस्मिन् दिवसे महोत्सवपरो मुक्तागृहस्योपरि○
ज्योत्स्नायामुपविश्य देवपतिवत् श्लाध्यासने कान्तिमान् ।
राजा श्रीजयसिंह एष मतिमान् शृङ्गारगङ्गाधरान्
श्लोकान् श्रीकविविश्वनाथरचितान् सुश्राव नानाविधान् ।।३।।

दृष्ट्वा शीतलदीधतौ कुमुदिनीबन्धौ कलानां निधौ
नीलं रूपमसौ कलङ्क इति मा मुग्धानने निश्चिनु ।
सुप्तायाः प्रियवक्षसि श्रममपाकर्तुं रताधिक्यजं
रोहिण्या गतबन्धनो निधुवने धम्मिल्लभारोऽस्त्ययम् ।।४।।

सा सम्पूर्णदिनं सुधाधरमुखी लज्जाभरैरश्रवो
मुञ्चन्ती मदनानलेषु वसति स्वामिन् रजन्यां पुनः ।
आस्ते नेत्रपथ–प्रवाहपतिता त्वत्प्राप्तिकामाधुना
स्नेहस्तत्र विधीयतां मृदुतनौ जातं हि पूर्णं तपः ।।५।।

शुष्यंति प्रतिवासरं सहचरीवर्गैरनङ्गज्वरै–
स्तप्ते तद् हृदयेऽर्पिताः कमलिनीशैवालवत्यो हि यत् ।
तत् किं वच्मि तदङ्गसङ्गमवती विश्वम्भरापि क्षणाद्
दग्धा स्याद्यदि तां न साऽखिलनिशं सिञ्चेत् स्वनेत्राम्बुभिः ।।६।।

⩽ पावीरवी=विद्युत्कन्या ।

○ 'मोती महल' नाम्ना प्रसिद्धस्य भवनस्योपरि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जाताः शैवालहीनाः प्रभुवर सरितः पत्रहीना नलिन्यः
सख्यः श्रीखण्डसेकव्यजनघनसमान्दोलनैः खिन्नहस्ताः ।
वृत्ताः सौख्यं न किञ्चित् तदपि किमिति तद्वाक्यमस्या यदुष्णैः
श्वासैः सर्वो जनोऽपि प्रतपति जनितग्रीष्मकालैर्विशालैः ।।७।।

स्थातुं गृहे विरहपावकदीपिताङ्ग-
ज्वालाकुले मृदुतनुर्न हि सा समर्था ।
त्वद्- दर्शनार्थमसुरक्षणकृत्कृशाङ्गी
दृग्वृन्दभारभयतो न बहिः प्रयाति ।।८।।

क्वचिदपि रुचिरस्या नास्ति यद्यप्यशेषा-
ऽवनितलकृतभूषा मालिकायाः सुकेश्याः ।
तदपि च तव नामाकर्ण्य रोमाञ्चिताङ्गी
भवति सुखविशेषाद् गीतिभिर्वा कुरङ्गी ।।९।।

मनोभाराक्रान्ता सदसि बहिरायाति यदि चेत्
कदाचिद् दृग्भारैरपि भवति खिन्ना बहु तदा ।
इदं भारद्वन्द्वं वहति कथमित्थं वदसि चेत्
कृशाङ्गी साऽऽरूढा रथमुरुनितम्बाख्यमधुना ।।१०।।

तां वीक्षितुं विधुमुखीं चलितां भवानी-
मभ्यर्चितुं पुरजनाः प्रतिरथ्यमीयुः ।
तेषां न कैश्चिदपि सैक्षि समग्रकाया
यस्मात् पराङ्गमगमन्न दृगेकलग्ना[३६] ।।११।।

इयं सरसलोचना सकलदुःखसम्मोचना
तनौ खचितकाञ्चना रुचिजितार्द्रगोरोचना ।
कुसुंभवसनाञ्चना मुनिमनोऽपि या वञ्चना
परा हरति किञ्चनाऽमरसमर्चनातत्परा ।।१२।।

---

३६. क. क्षणैकलग्ना ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निर्माय तां विधुमुखीं प्रथमं विधाता
तस्या अथो अवकरैः करणैरुपेतः ।
विद्युल्लताकनककेतककेसराणां
जानामि सृष्टिमकरोदथ चम्पकानाम् ॥१३॥

सा देवता शुचिरसस्य किमौषधिर्वा
सम्मोहिनी मनसिजस्य नवा रमा वा ।
अस्याः स्वभावमधुरप्रियदर्शनाया
नायं विधिः सकलविश्वविलक्षणायाः ॥१४॥

लक्ष्मीमम्बुनिधेरिवामरनदीमध्याद् बहिर्निर्गतां
वीक्ष्याम्भोऽपि यदि प्रयाति सपदि श्लिष्ट्वा समस्तां तनुम् ।
कश्चैतन्यभृदक्षभृन्नयनभृत्– निःसीमरूपस्वरां
मृद्वङ्गीं प्रभवेत् पृथङ् निजतनोः कर्तुं क्षणार्द्धं प्रियम् ॥१५॥

यस्यैषा रशनालबालकलितालावण्यवाःसिञ्चिता
वक्षोजस्तबकाञ्चिता रसलता भोगाय धात्रा कृता ।
प्रायस्तस्य सुवासरे जनुरभूत्तप्तं तपस्तेन वा
स्फारं प्राग्जननेऽन्यथा कथमिदं रम्यं भजेद् वस्तु सः ॥१६॥

यस्तां पार्वणरोहिणीरमणभागर्वापहास्यप्रभां
भुङ्क्ते चञ्चललोचनामिह सदा धन्योऽस्ति सोऽयं नरः ।
एतत् किं कथनीयमत्र भुवने मिथ्याभिशापोऽपि वा
यस्या यास्यति साधु सार्द्धमनया सोऽप्यस्ति धन्यो जनः ॥१७॥

असावाशु प्रांशुस्तनभरनता वेश्मशिरसि
स्थितिं धृत्वा कृत्वा बहिरथ निचोलं कुचतटात् ।
वधूर्मन्दं मन्दं परिचलितवायोः परिचयं
प्रकुर्वाणाऽनङ्गं रचयति हि साङ्गं स्मितरुचा ॥१८॥

पुरा कृत्वाऽभ्यङ्गं बहुसुरभितैलेन सुमुखी
समारूढा हर्म्यं रविमहसि केशान् प्लवयितुम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततो[३७] न्यञ्चत् किञ्चिद्विवृतकुचमेतन्न हतकृत्
कृशाङ्गी संसारं रचयति ससारं स्मितरुचा ॥१९॥

एषा पञ्चशरस्य किं सहचरी किं वाऽस्ति विद्याधरी
किं वा वीक्षितुमागता क्षितितलं काचिद् दिवः सुन्दरी ।
किं वा वारिसुरी किमुज्ज्वलपुरी किं नागकन्येश्वरी
तां दृष्ट्वा सुदतीं भवन्ति विविधास्तर्का मदीये हृदि ॥२०॥

यस्याः कान्तिरनुत्तमा तनुरपि स्वाभाविकं सौरभं
धत्ते वागमृतोपमा रसधुनीमुत्पादयन्ती श्रुतौ ।
दृष्टिः कामदुघा स्मितं च कपिला दुग्धाब्धिरेवं विधा
मुग्धा यद्भवने तदेव भवनं स्वर्वासिनां विद्महे ॥२१॥

यासां गीर्षु सुधारसः स्रवति यद्वक्त्रस्य पूर्णोऽप्यसौ
चन्द्रो लज्जति याभिरात्मगतिभिर्हंसीगतिर्निर्जिता ।
याः संवीक्ष्य भवन्ति योगविमुखा योगीश्वरास्तेऽपि ता
धन्यानां भवने वसन्ति वनिता विश्वेश्वरानुग्रहात् ॥२२॥

गजेन्द्रगतिगामिनी गजकरोरुभाशालिनी
गजप्रभवमौक्तिकाभरणमालिकाधारिणी ।
गजार्भककटस्तनी⩽ गजमुखार्चनाकारिणी
गजाजिनधरार्चनाद् भवति मन्दिरे कामिनी ॥२३॥

मिताक्षराऽल्पविस्तारा पदालङ्कारशालिनी ।
अनुष्टुप्कवितातुल्या नवीना कुलकामिनी ॥२४॥

सद्वृत्ता सद्गुणोपेता सदलङ्कृतिशोभिता ।
कान्ता कान्ता च कविता कण्ठे भाग्यवतां सदा ॥२५॥

निर्दोषा पदभायुक्ता सुकवेरसनायिता ।
सुवर्णालङ्कृतिध्वाना कविता कामिनी समा ॥२६॥

३७ ख तनौ ।
⩽ कटो वा श्रोणिफलकमित्यमरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकमेव द्विधाभूतं भ्रान्तधात्रा कृतं वपुः ।
नो चेत् पुनः पुनः श्लेषव्याजादेकं कथं भवेत् ।।२७।।

अद्वैतीभावमापन्नं संश्लेषे कामिनोर्वपुः ।
द्वैधीभावं पुनर्मध्ये मध्ये गृह्णाति रोचकम् ।।२८।।

कथां पातिव्रत्यव्रतविषयिणीं व्यासलिखितां
जनन्याः शृण्वन्ती शिशुवयसि किञ्चित् स्थितवती ।
न पाञ्चालीखेले⊖ स्पृशति पुरुषस्य प्रतिकृतिं
क्षणं चिन्तायुक्ता वपुषि पुलकालिं रचयति ।।२९।।

मातुः प्राणसमा पितुश्च परमानन्दास्पदं नेत्रयो-
र्बन्धूनां बहुसम्मता सहचरीवर्गस्य जीवाधिका ।
दैवात् त्वत्करपङ्कजेऽस्ति विधिना दत्ता तदेषा तथा
संस्थाप्या भवता गृहेषु सुहृदां शोच्या हि न स्याद्यथा ।।३०।।

एता विष्वङ्नगर्या विरहिजनमनो मोहयन्त्यो मनोभू-
दूत्यो व्यर्थं किमर्थं नयत वय इदं माधवी रात्रिरेषा ।
एवं शिक्षापयन्त्यो धृतकलहवधूरुत्सवं वर्द्धयन्त्यो
गायन्त्युद्यानभूमीरुहकृतसदनाः कोकिलाः कान्ततानाः ।।३१।।

एताश्चन्द्ररुचः पिकस्त्रिय इमा एते च पुष्पानिलाः
सर्वे मां परिपीडयन्तु वपुषा वाचाऽऽस्यवासैर्जिताः ।
आश्चर्यं समयस्य यस्य सखि मे तातेन या वर्द्धिता-
स्ता एता अपि मां दहन्ति कुसुमैरम्भोजिनीराजयः ।।३२।।

किं वा वदामि सखि बालिशतां जनानां
जानन्त्यमी विरहिणां न हि जीवपीडाम् ।
ज्ञाता भवेद्यदि च तैस्तदसत्कृतीनां
दद्युः कथं बलिभुजां बलिपिण्डमेषाम् ।।३३।।

यज्ञकर्मणि रुचिः परमा मे वर्तते सखि परं न हि दर्शे ।
दर्शयाग इह चेद्यदि न स्यात् तत् कथं तु मम चन्द्रभयं स्यात् ।।३४।।

⊖ 'गुड्डा गुड्डी का खेल' इति भाषायाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वे स्तुवन्ति विबुधा भुवि षड्ऋतूनां
मध्ये वसन्तमधिकं तदिदं मृषाऽस्ति ।
एतत्समो न हि परो जनतापकारी
यस्मिंस्तु वार्यपि भवेज्जनतापकारि ।।३५।।

पुत्रि प्रियोऽपि जगतां बहुधा प्रियस्ते
सम्पूर्ण एव भविता मधुमास एषः ।
प्राप्तेषु माधवदिनेषु सुखस्य धारा
स्फारा भविष्यति सदैव सुधानुकारा ।।३६।।

असौ कमललोचनो विविधमङ्गलानां गृहं
त्विषा जितरतीश्वरो मुखरुचा सुधाभानुमान् ।
सुधामधुरभाषणो जलजजन्मना निर्मितो
नृपोऽस्ति निजकौशलं भुवि विकासितुं तर्कये ।।३७।।

कस्याश्चिद् विरहेण साम्प्रतमसौ ग्रीष्मोऽपि पुष्पोपमो
दीप्त्या चम्पकपुष्पदामसदृशा नित्यं परा हीयते ।
श्वासान्माधवधर्ममध्यपतितैः श्रीदक्षिणाशानिलै-
स्तुल्यान् मुञ्चति सर्वदा नृपसुतैः सार्द्धं बहिः क्रीडते ।।३८।।

स्वयं स्मरति शङ्करौ तव कुचौ विविक्ते वसन्
कथासु रमते च ते तव गुणान् समाकर्णयन्[३८] ।
मया च बहु कारयत्ययमये तवाराधनां
प्रसीद सुभगेऽधुना भवतु तेऽभिकः शर्मवान् ।।३९।।

समक्षं लोकानां नयति नतिमास्यं न वचनं
वदत्युच्चैः कस्याप्युदितनिजमर्मोद्धृतिभिया ।
जनानां वार्तासु श्रवणयुगमासञ्जयति सा
स्ववार्तां शङ्कन्ती सुभग तव दृष्टेः फलमिदम् ।।४०।।

३८. क. प्रतौ पद्येऽस्मिन् लिपिकर्तृप्रमादात् शब्दव्युत्क्रमो जातः यथा—
'शकरौ तव कुचौ विविक्ते वसन् कथासु स्वयं
स्मरति रमते च ते तव गुणान् समाकर्णयन् ।।'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाक्ये नो चटुता दृशोर्न चलता वक्षस्थले नोन्नता
मध्ये नो कृशता कटौ न गुरुता नो वा गतौ मन्दता ।
अङ्गे नो मृदुता तथापि जगतामाह्लादिनी रम्यता
तस्यां कापि मया घनावृतशशिज्योत्स्नेव संलक्षिता ॥४१॥

जाने यद्यपि तां सुधाकरमुखीं प्राप्स्यामहं स्वल्पकै-
रेवाहोभिरिदं तथापि हृदयं प्राप्नोति नो निर्वृतिम् ।
यत्सत्यं ब्रुवते जना विरहिणां सर्वं हि दुःखायते
नो चेत्सर्वसुखप्रदा कथमियं ज्योत्स्ना भृशं मां दहेत् ॥४२॥

यदा प्रभृति सा मया जनमुखाच्छ्रुता सुन्दरी
तदा प्रभृति मे मनो व्रजति नान्यभावं प्रति ।
इदं समुचितं यतः सकलभावभूमिः प्रिया
परन्त्वनुचितं जनो वदति मामधीरं पुरा ॥४३॥

अधीराक्ष्या द्राक्षासमवचनवाच्या रतिसुखं
सुखं ब्रह्माद्वैतं स्मृतिपथगतं न ग्लपयति ।
परं त्वब्दादर्वाक् सदसि परियामीति वचनं
समाकर्ण्य प्रह्वीकृतममलमास्यं व्यथयति ॥४४॥

सा कान्ता शुचिभूषिता तदमलं वक्त्रं स वाचां क्रम-
स्ते नेत्रे च चकोरनेत्रचपले गल्लौ च तौ कोमलौ ।
सर्वं मे सविधस्थितस्य तदभूत् पीयूषवत् सौख्यदं
दूरस्थस्य तु जातमद्य खदिराङ्गारोच्चयात्रापदम् ॥४५॥

त्वं तस्या मुखचक्रवालसदृशश्चन्द्रासि दीप्तिश्च ते
तत्कान्तेस्तुलनां प्रयाति सकलैर्लोकैरिति स्तूयते ।
सा मां नन्दयति प्रिया स्मृतिमिता त्वं तापकृद्दर्शना-
द्युक्तं चेदमियं हि निर्मलमुखी त्वं रे कलङ्कान्वितः ॥४६॥

अवगुण्ठनचैलमुद्वहत्याश्चलितायाः दयितालयं युवत्याः ।
गुरुलोचनवञ्चनां सृजन्त्याश्चतुरायाः किमपि स्मितं स्मरामः ॥४७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुरुभिः सह सत्वरं व्रजन्ती, सहसा मां पथि वीक्ष्य कुन्ददन्ती ।
निभृतं नयनाञ्चलं क्षिपन्ती, चतुरा मे हृदयाद् बहिर्न याति ।।४८।।

मध्ये मार्गं क्व यासीति प्रष्टुकाममपेक्ष्य[३९] मां ।
गुरुमध्यगता किञ्चित्तिर्यग्ग्रीवं न्यवारयत् ।।४९।।

यमुनाजलकोमलालकान्ता यमुं नामग्रहणेषु वक्ति कान्ता ।
यमुं ना च रते मुहुर्गृहीता यमुं ना धन्यतमोऽयमस्ति भोक्ता*।।५०।।

कालिन्दीजलमलिनामलस्वभावा–
श्चुम्बन्तः पदकमलेऽलिवद्विमुक्ताः ।
ये वक्रा अपि सुमनोभिरिच्छमानाः
स्वं कर्तुं सफलममी जयन्ति केशाः ।।५१।।

यद्भीत्या वनमनिशं मृगा भजन्ते
पद्मौघा महदुदके तपश्चरन्ते ।
एतस्या भ्रमिविजितालिविभ्रमायाः
सा दृष्टिर्जयति हि सज्जनाङ्गनायाः ।।५२।।

कस्यैषा तरुणी गतेन करिणी वाचा सुधोद्गारिणी
नेत्राभ्यां हरिणी चकोरगृहिणीगर्वांग्रहाहारिणी ।
यूनामुन्मदकारिणी मुखरुचा चन्द्रे त्रपाधारिणी
स्नाति श्रीरिव वारिणीह जगतां कान्तास्वसाधारिणी ।।५३।।

त्वं धात्रा भुवि निर्मिता न हि तथा येन त्वदीयाननं
पीयूषद्युतिहारि वीक्ष्य मनुजो न स्यात् तवाज्ञाकरः ।
एवं सत्यपि साम्प्रतं प्रतिदिनं कामप्यपूर्वां श्रियं
बिभ्राणा नतवर्ष्मणा व्रजसि तद्युक्तं गरिम्णो हृदः ।।५४।।

---

३९. ख. प्रष्टुकाममवेक्ष्य ।

* यस्याः कान्ताया अलकान्ता यमुनाजलकोमला मेचकाः सन्ति । या कान्ता नामग्रहणेषु यं 'उ' इति शब्दं वक्ति, या कान्ता रते मुहुर्गृहीता सती यं 'उ' 'ना' वक्ति, यं 'उ' 'ना' इति शब्दं वदन्त्या कान्तायाः भोक्ता अयं जनो धन्यतमोऽस्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एषोत्तुङ्गपयोधरद्वयजितोन्मत्तेभकुम्भद्वया
राकारात्रिभवेन्दुबन्धुवदना नीलाम्बुजातेक्षणा ।
कान्ता गच्छति पश्य मित्र सुभगा कस्यापि पुण्यात्मनः
कुर्वन्ती निजदर्शनेन सकलान् लोकान् कृतार्थानिमान् ॥५५॥

असौ सुगजगामिनी वपुषि चन्दनामोदिनी
त्विषां वसति मेदिनी शिरसि माल्यमामालिनी ।
यथा मदनकामिनी नववयो सुधावाहिनी
तपस्विजनमोहिनी व्रजति कस्यचित् कामिनी ॥५६॥

खर्जूरपिण्डसमगण्डयुगाम्बुजास्या
पीयूषपूर्णरुचिराधरपल्लवा सा ।
कन्दर्पकन्दुककुचाञ्चितचारुवक्षा
यस्येयमस्ति गृहिणी स नरैर्नमस्यः ॥५७॥

उत्फुल्लकैरवलसन्नयनद्वयाभ्यां
पूर्वोदितेन्दुवदनामतिसूक्ष्ममध्याम् ।
कः पुण्यवान् बिसलतामृदुबाहुमेना-
मालिङ्गते कनककान्तिसमाङ्गशोभाम् ॥५८॥

पद्मं पाणिपदेन लोचनरुचा नीलाब्जमास्यश्रिया
शीतांशुं रदनाधरेण च समं कुन्दालिबिम्बाफलम् ।
प्राक् स्पर्द्धन्त इदं शठान्यथ सपत्न्येषा हि ता सन्निधौ
न स्याच्चेत् प्रियदृक्कृपा सखि तदा तज्जेतृका स्यां कथम् ॥५९॥

क्षीराम्भोधिसमान एष तनयातातोऽस्ति कन्याप्यसौ
लक्ष्मीवद्गुणशालिनी वरयिता पृथ्व्यां परः कौशिकः ।
साक्षाद् विष्णुसमान एष च वरो येऽत्रागता ब्राह्मणाः
सन्त्येते विबुधा हरेरिव महानेषोऽस्ति पाणिग्रहः ॥६०॥

हित्वा रत्नगिरीन् विहाय सकलान् विध्यादिकान् निर्जरान्
दूरीकृत्य सुरद्रुमान् स हिमवान् सप्तर्षिवाक्यान्निजाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कन्यां प्राणसमां ददौ गुणवतीं तां पार्वतीं योगिने
कैलासाचलवासिने तदखिलं प्रेम्णः फलं विद्महे ॥६१॥

कार्णाटी कुचपर्वतोच्चतटिकापाटीरपङ्कार्द्रिता
मल्लीपद्मकदम्बकुन्दकलिकासौगन्ध्यधारान्विता ।
मन्दं धूतसुभूतनूतलतिका कामाग्निसन्दीपिका
वान्ति श्रीकमलाशयाम्बुकणिकाः संवाहका मारुताः ॥६२॥

नम्रीभूय तवागमे कुसुमिता यत्सौरभं भूरुहा
यच्छन्ते भवते त्वमेतदखिलं तीर्थेषु नीत्वा द्विजान् ।
स्नात्वा प्रीणयसे सुकर्मफलितं तत् ते यतः कञ्चुकी-
र्मुक्त्वा त्वां नृपकन्यका अपि शुचौ गृह्णन्ति देहोपरि ॥६३॥

त्वत्कीर्त्या घनसारपूरसदृशा व्याप्ते जगन्मण्डले
मन्दं षड्गुरिव भ्रमन् कमलिनी श्रीकुब्जकानां○ वनीः ।
उत्फुल्ला रचयन् समग्ररजनीक्रीडापरस्त्रीश्रमं
निघ्नन्नेव सुखाय तेऽस्तु नृपते श्रीमान् वसन्तानिलः ॥६४॥

मन्दाकिन्याः कनकबिसिनीगन्धहारी पृथिव्यां
तत्तत्तीर्थोदकलवहरः पुष्पवाटीः स्पृशन् यः ।
पण्यस्त्रीणां कुचमलयजे विश्रमं प्राप्नुवन् सन्
राजन् मन्दं चलति पवनस्त्वद्भयात् तर्कयामः ॥६५॥

नासाचम्पकपुष्पनेत्रनलिन- भ्रूवल्लिदूर्वालिक-
ग्लौलेखाधर- बन्धुजीवरदन- श्रीमौक्तिकैरञ्चितम् ।
आत्मीयाननमेव हेमरचितं मुग्धेऽद्य मे दर्शय
प्रातर्मङ्गलपात्रमस्तु सकलं तद्दर्शनान्मङ्गलम् ॥६६॥

जगत्त्रितयपालिका सकलशत्रुसंहारिका
त्रिवर्गसुखदायिका निखिलयोगिनीनायिका ।

○ कुब्जो वृक्षप्रभेदे ना न्युब्जः स्याद् वाच्यलिङ्गक इति मेदिनी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुणप्रसववल्लिका द्युतिजितार्द्रहारिद्रका
तुषारगिरिबालिका जयति पार्वती मातृका ।।६७।।

सचामरकराब्धिजाजलजयोनिजासेवितं
नमत्त्रिदशसुन्दरीनिटिललग्नपादप्रभम् ।
सुरद्रुभवनान्तरे मणिगृहे शिवाङ्के स्थितं
सदा वसतु मानसे गिरिपतेरपत्यं शुभम् ।।६८।।

एवं श्रीजयसिंहनामनृपतिं संतोष्य पद्यैर्निजैः
श्रीरामस्य कलावतारभवनौ श्रीविश्वनाथः कविः ।
पूर्णायाथ समर्प्य काव्यसुकृतं तस्मै वरे पुष्करे
काव्यं कर्तुमगाद् द्वितीयमुचितं काश्यां शिवस्यालये ।।६९।।

इति श्रीचित्तपावनजातीयरानडोपनामककविविश्वनाथभट्टपण्डितविरचिते श्रीरामविलासनामकाव्ये चतुर्थः सर्गः ।।

संवत् १७६६ चैत्र शुद्ध ९ रामनवम्यां सम्पूर्णम् ।। संवत १७६६ श. १६३१ कार्तिक कृष्णा २ लि० तुलाराम भट्टजी श्रीविश्वनाथजीकस्याज्ञया ।। श्रीरस्तु ।। मङ्गलमभ्युदयश्चास्तु ।। श्रीरामाय नमः ।।[४०]

४०. ख. परमानन्दमुनिलिपि [पी] कृतमस्ति भट्ट हरकिशनजी आग्रह क्रियते ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीः

पद्यानुक्रमणिका

अंद्राक्षैपैः क्षताङ्गान् २.३४
अथो विश्वभर्तुर्द्वितीये परार्द्धे ३.९
अद्वैतीभावमापन्नं ४.२८
अधीराक्ष्याद्राक्षासमस्वन- ४.४४
अध्वर्यौ हरिकृष्णनाम्नि ३.४०
अनश्विनि पुनर्वसुद्युति ३.६९
अनेकपञ्चाननदुर्गगर्भं ३.७२
अर्द्धाङ्गाः कतिचित्कृताः १.४६
अवगुण्ठनचैलमुद्वहन्त्या ४.४७
असंख्यऋक्षावलिसंकुलान्तरं ३.७३
असाधारणं कारणं कर्षणे किं ३.१०३
असावाशु प्रांशुस्तनभरनता ४.१८
असौ कमललोचनो ४.३७
असौ सुगजगामिनी ४.५६
अस्मिन् राज्ञि जले च खे च १.३०
अस्मिन् श्रीजयसिंहनाम्नि नृपतौ १.९
अस्मिन् श्रीमति विष्णुसिंह नृपतौ १.२९
अहो विविधमङ्गला १.२३
आकाशो न भवत्ययं ३.५८
आग्नीषोमीययागे ३.४३
आजौ प्राप्तजयो १.५०
आत्रेयो जयरामोऽत्र ३.२६
आम्बेकरो जगन्नाथो ३.२५
आरामाधिपते ममास्ति भवने ३.८०
आशास्यं किमु वाम्बुवाहनिवहं ३.८५
आश्चर्यं किमिदं २.१
आश्चर्यं प्रतिकूलभूपवनिता २.२२
आसीत् सूर्यकुले द्वितीयमनुवत् १.११
आसीद्भीमपुरो द्विजातिषु वरः ३.२२
इत्थं स्वैर्विशिखैर्निहत्य १.४९
इन्द्रो नित्यं मरुत्वान् २.९
इयं सरसलोचना ४.१२
इह भुवि जयसिंहे २.२५
इह हि तलगृहेषु प्रेयसीभिः ३.५
उच्चैरेतस्य राज्ञः २.३१
उत्तीर्याथ सुवर्णनिर्मित पदे ३.४८
उत्पन्ने धनदे त्वयि २.६
उत्पन्ने सति विष्णुसिंहतनये २.१८
उत्फुल्लकैरवलसन्नयन- ४.५८
उद्गाता जयकृष्णोऽत्र ३.३४
उपाख्यया च योऽमुष्यां ३.३१
एकमेव द्विधाऽऽभूतं ४.२७
एकस्मिन् दिवसे महोत्सवपरो ४.३
एकाक्षरं किं खगवाचि ३.१०२
एको गोत्रे प्रभवति पुमान् २.६३
एतस्मिन् समये नरेन्द्र २.४२
एतस्यां पुरि वेश्ममूर्द्धसु ३.४
एतस्यां भुवि भूमिपा २.१६
एता विश्वङ्नगर्या ४.३१
एताश्चन्द्ररुचः ४.३२
एते किं वा प्रदीपा २.६९
एवं श्रीजयसिंहनामनृपतिं ४.६९
एवं श्रौतविधानदक्षधिषणा ३.४५
एषा पञ्चशरस्य किं सहचरी ४.२०
एषोत्तुङ्गपयोधरद्वय- ४.५५
कति कति न हि भूमौ पक्षिणः ३.८६
कथां पातिव्रत्यव्रतविषयिणीं ४.२९
करधृतमिह यन्त्रं किं करोति ३.१००
कश्चित् पान्थस्तृषार्तः ३.९१
कस्मिंश्चित् समये नृपो १.३८
कस्याश्चिद्विरहेण साम्प्रतमसौ ४.३८
कस्यैषा तरुणी गतेन ४.५३
कामोऽनङ्गोऽस्ति १.३४
कायव्यूहं विधातुं २.१२
कार्णाटीकुचपर्वतोच्च ४.६२
कार्यं गुणान् कारण- ३.७५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कालिन्दीजलमलिनामल- ४.५१
काशीनाथसुतो विशुद्धमनसां २.५९
काश्यां धर्मपरायणो ३.१४
किं नक्षत्राणि किं वा ३.६१
किं वा वदामि सखि ४.३३
कृत्वैवं वरणं सुमनसां ३.३९
केचिद्वारिणि खेलनं २.४३
केचिद्विद्धा अविद्धा १.४४
कैलासे सनकादयो १.४
कोकौ ग्लौ द्युतिसंशयं वनगतिं ३.९२
को ज्ञानेन विना भवेद्भुवि ३.९५
क्वचिदपि रुचिरस्या ४.९
क्षीराम्भोधिसमान एष ४.६०
खड्गं ते विष्णुसूनो २.२६
खड्गैः खड्गान् द्विधा यो १.१६
खन्नैतन्न च भान्यमूनि ३.५५
खर्जूरपिण्डसमगण्डयुगा- ४.५७
गङ्गागण्यप्रवाहा ३.६४
गङ्गातीरकृतालयं प्रियवचो ३.८८
गङ्गाराम इहाथ दीक्षितः ३.२९
गङ्गारामसुतान्वितोऽथ ३.४६
गजारूढं राजन् २.३७
गजेन्द्रगतिगामिनी ४.२३
गाम्भीर्यस्थितिनिर्मलत्वं- २.६५
गुरुभिः सह सत्वरं ४.४८
घण्टासङ्घघनारवै- २.३३
चक्राणां विप्रयोगं परिहरति ३.१०९
चक्षुः सावर्ण्यभाजो २.६१
चञ्चद्वेणिजटं १.३
चमसाध्वर्यवो जाता ३.३८
जगत्त्रितयमालिका ४.६७
जगत्यां श्रीमत्यां ३.८७
जनानां परं प्रीतिदे ३.१०
जाताः शैवालहीनाः ४.७
जाने यद्यपि तां सुधाकरमुखीं ४.४२
जिह्वा कस्य कवेस्तथास्ति १.२१
जीव त्वं शरदां शतं ३.९४
जीवामोऽत्र वयं नवेति १.२५
झटाझटि समुत्पतत् १.४८
तं शङ्खं प्रथमे २.७
तत्रात्युद्भटराजपुत्रसुभटाः १.४१
तत्राद्येऽहनि सूरिपूर्णसदने ३.२१
तव पितुः सदने बहवो नृपाः ३.९८
तस्मात्कीर्तिसितीकृत- १.१५
तस्मान्मानिजनादि- १.१८
तस्मिन् देवसमानचारुचरिते १.३२
तस्मिन् भूरितरान्निजान् १.२७
तस्मिन् वन्दिमुखाम्बुजेषु १.१७
तस्य श्रीयुतरामसिंहनृपतेः १.२६
तस्याशेषाचलेशैरनुसृतसरणेः १.१९
तां वीक्षितुं विधुमुखीं ४.११
त्वं तस्या मुखचक्रवाल ४.४६
त्वं धात्रा भुविनिर्मिता ४.५४
त्वं मां हित्वा स्वकान्तां ३.१०८
त्वत्कीर्त्या घनसारपूरसदृशा ४.६४
त्वद्दानातिशयं विलोक्य २.३
त्वद्बाहा इव नेत्रयोर्न हि २.२३
त्वां सर्वाङ्गसुलक्षणे २.४०
त्वां हित्वा कमिवान्यभूरुहं ३.७८
दत्वा दानानि राजा १.४०
दत्वा भोजनमंशुकादिभिरलं ३.७
दशपुत्रोपनामास्मिन् ३.२७
दातृत्वमास्तां नृपते सदैव २.६६
दानं तस्य समस्तपार्थिव- १.२८
दारिद्र्याम्बुनिधेः प्रपारगमने २.३२
दिनर्क्षे तु पुण्ये सति ३.१३
दृष्ट्वा शीतलदीधतौ ३.६०; ४.४
द्वीपं देव विलोक्य जाम्बवमिदं २.६७
धनुर्ज्या कुत्रास्ते विविधरस- ३.९७
धनुः पौष्पं कोटौ स्थित- ३.९६
धर्मास्तस्य कुलोचितान् १.३१
धर्मास्त्वमिमं हि वायसशिशुं ३.८९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्मे मनो यस्य रतं न पुंसि ३.९९
धाराधावद्धयालि- २.२१
धाराशृङ्गैर्दिवसमखिलं ३.३
धृत्वा तं शकटोपरि ३.४२
न भवति विधुरङ्के नाङ्कितो ३.१०१
नम्रीभूतं त्वदीये २.२४
नम्रीभूय तदागमे ४.६३
न श्वो यस्य दिशां २.३८
नानापक्वान्ननानावटक ३.६
नानासूनुसमाकुले परभृतां २.५३
नासा चम्पक पुष्प नेत्रनलिनभ्रू ४.६६
नित्यं कोशविलोदरे २.२७
नित्यं मङ्गलवान् २.१७
निर्दोषा पद्धायुक्ता ४.२६
निर्माय तां विधुमुखीं ४.१३
नेष्टा द्रोणोपनामात्र ३.२४
नेदं विष्णुपदं प्रभो ३.५६
नैतद्व्योमास्ति किन्तु ३.५४
पद्मं पाणिपदेन ४.५९
पद्मानन्दकरो जगत्तिमिरहृत् २.५४
पश्यन् त्रैलोक्यमेतत् २.५६
पुत्रस्तस्य पुराणविद्दिनकरो ३.१६
पुत्रस्तस्यातिभव्यो ३.२०
पुत्रि प्रियोऽपि जगतां ४.३६
पुत्रो यो भानुभट्टस्य ३.३३
पुरा कृत्वाभ्यङ्गं ४.१९
पूर्वं त्रेतायुगे यो १.८
पृथ्वीं पृथ्वीं क्षणेन भ्रमत २.३९
प्रत्यक्षादिकसत्प्रमाणनिपुण- ३.६७
प्रभाकरो भास्करवत्प्रभावान् ३.१७
प्रस्तोता वाजपेयेऽस्मिन् ३.३५
प्रागासं नगरेषु तत्र ३.९३
प्रातर्यो यमुनाजलान्तरगते ३.१८
प्रीत्यर्थं रघुनायकस्य १.१०
बाल्ये खेलनमेव मुक्ति २.६४
बीजं यस्य रमा शिफास्तु ३.६३
ब्रह्माण्डं येन शुण्डानि २.४६
भो भो कान्त क्षणमुपविश ३.७०
भो भो केतकि तावकीनकुसुमं ३.८४
भो साधो कुत आगतोऽसि ३.१०४
मण्डूकप्लुतिमेत्य ३.७७
मद्ग्रामागत विप्र ३.१०५
मद्वारि प्रतिगृह्य गर्जसि ३.८१
मध्ये मार्गं क्व यासीति ४.४९
मनोभाराक्रान्ता यदसि ४.१०
मन्त्रार्थवादावथ नामधेयं ३.७४
मन्दाकिन्याः कनकबिसिनी ४.६५
महाशब्दोपनामास्मिन् ३.२३
मातुः प्राणसमा ४.३०
मात्राऽहं जनिकाल एव ३.७१
मामालोक्य प्रतापोज्ज्वलित- २.११
मार्तण्डोद्दण्डकोऽस्त्रै- ३.८२
माली लालयति द्रुमान् ३.७९
मिताक्षराऽल्पविस्तरा ४.२४
मीमांसको लोचितभूरिसूत्रो ३.३७
मीमांसाद्वयतर्कशास्त्र- ३.१९
मोक्तुं नेच्छति दाववह्नि- २.२०
मौञ्जीदण्डमृगाजिनानि ३.४१
मृद्भाण्डानि ममालये ३.६८
यं दावे सर्वशैलास्त्रिभुवन- २.५०
यं ध्यायन्ति सनातनं १.५
यं नीलाम्बुदसन्निभं २.५१
यः सौजन्यनिधिर्वार्ता- ३.३२
यच्छिष्यै रचिता जयन्ति १.१
यज्ञकर्मणि रुचिः परमा मे ४.३४
यज्ञान्तेऽवभृथाभिषेक- ३.४९
यत्कान्तिर्यमुनाकदम्ब- २.४९
यत्सौधा गगनं गता ३.२
यदा प्रभृति सा मया ४.४३
यद्गेहे शम्भुपूजा भवति २.६०
यद्गोपीनयनाञ्जनं २.५२
यद्भीत्या वनमनिशं ४.५२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्वेगस्य खगव्रजाः २.३५
यमुनाजलकोमलालकान्ता ४.५०
यस्तां पार्वणरोहिणीरमण- ४.१७
यस्मिन्नभ्युदिते सति २.५५
यस्मिन् पूर्वाद्रिशृङ्गोपरि १.६
यस्मिन्नित्यं समन्तात् १.१२
यस्मिन् वेदप्रसिद्धान्यधिमहसि १.१३
यस्मिन् शासति मेदिनीं १.१४
यस्मिन् प्रत्यर्थिपृथ्वीपति १.२०
यस्याः कान्तिरनुत्तमा ४.२१
यस्याः संस्मरणं मलौघशमनं २.५७
यस्यैषा रशनालवाल- ४.१६
या प्रातः सवने बभूव सुषमा ३.४४
यासां गीर्षु सुधारसः ४.२२
येन श्रीब्रह्मपुत्राभिधनद- १.२४
येनागस्त्यरुचा प्रकाशितदिशि १.३३
योजात्या भुवि चित्तपावनइति १.५१; २.७२; ३.१११
योऽज्ञानान्धतमोवृते २.४५
यो निर्गुणोऽपि समभूत ४.२
यो वर्गाश्चतुरः १.२
यो वेदं समधीत्य ३.१५
रक्षापार्थिववस्तुनो ३.६५
रम्यं चन्द्रं क्षयाङ्गं २.७१
राजन् त्वद्रिपुभिः श्रुतं ३.७६
राजन् दिग्विजयं २.१४
राजन्नुष्णीषमेतत्तव २.२९
राजन्नैतन्नभस्तत् ३.५३
राजन्नैतद्विहायो विलसति ३.५२
राजन् प्रोषितभर्तृका इव ३.१०६
राजन् श्रीविष्णुसिंहात्मज २.१५
राजन् सम्प्रति रात्रिजन्मसमये २.६८
राजन् सम्प्रति सन्ध्यया सह २.७०
राजन् सम्प्रति सर्वतो गुणनिकां ३.१०७
राजँस्त्रैलोक्यमेतन्न भवति ३.५७
राजँस्त्वत्कीर्त्तिचन्द्रे २.१०
राजँस्त्वत्कीर्तिवर्द्धिः २.४
राजँस्त्वत्कीर्तिहंसी २.२
राजँस्त्वत्खेटपृष्ठं २.२८
राजँस्त्वां प्रति याच्यते ३.६२
राजा किञ्चिदसौ १.४३
राजा श्रीजयसिंह एष ३.११०
राजाऽस्यां जयसिंह एव १.३६
राज्ञोऽग्रे खलु रावुरावलयुताः १.४७
रामडोहकरश्चास्मिन् ३.२८
रे रे शूकर वीथिकागत ३.९०
लक्ष्मीमम्बुनिधेरिवामरनदी- ४.१५
लङ्कायां पुरि राक्षसैः १.४५
लङ्कायामिव राक्षसैरथ १.४२
लट्टूपनामा यो विप्रो ३.३०
वाक्ये नो चटुता ४.४१
विधोर्नेदं बिम्बं ३.५९
विलम्ब्याख्यसंवत्सरे ३.१२
वेदव्यासधिया समानमतिना ३.८
वैकुण्ठे गरुड़ो दिवि २.३६
शङ्करौ तव कुचौ ४.३९
शुक्ले चन्द्रकला यथा- २.३०
शुण्डादण्डेन येनोद्गमित- २.४७
शुम्भाद्ये दनुजव्रजे १.७
शुष्यन्ति प्रतिवासरं ४.६
श्रीमज्जह्नुसुता तदङ्गकलिका २.५८
श्रीमन् मानसराजहंस ३.८३
श्रीमान् छत्रपतिः २.१३
श्रीरत्नाकरदीक्षितस्य ३.५०
श्रीरत्नाकरदीक्षितोत्तमगुरु- १.३७
श्रीरत्नाकरदीक्षितोत्तमगुरोर्यागे ३.५१
श्रुत्वा त्वद्दानमुद्रा- २.८
श्रौतस्मार्तपुराणदृष्टसुकृते २.६२
संग्रामाङ्गणमागतं १.३५
सचामरकराध्विजा ४.६८
सत्यं लोकं विधात्रे ४.१
सदा शान्तियुक्तेऽथ ३.११

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सद्वृत्ता सद्गुणोपेता	४.२५	सूनुस्तस्य सुधार्णवोदित-	१.२२
समक्षं लोकानां नयति	४.४०	सेवा यस्य निजे गृहे	२.४८
सर्वे स्तुवन्ति विबुधा भुवि	४.३५	सौन्दर्येण रतीश्वरो	२.१९
सा कान्ता शुचिभूषिता	४.४५	सौवर्णस्य गिरेः	२.५
सा देवता शुचिरसस्य	४.१४	स्थातुं गृहे विरहपावक-	४.८
सा सम्पूर्णदिनं सुधाधरमुखी	४.५	स्थित्वा सांभरपत्तने	३.१
सिंहस्तिष्ठति यत्र तत्र न	३.६६	स्नात्वा पर्वणि तत्र	१.३९
सुब्रह्मण्यो जगन्नाथो	३.३६	हस्ताभ्यां दश दिक्ष	३.४७
सुललितपदबन्धं	२.४४	हित्वा रत्नगिरीन	४.६१
सूत्रैर्हेमविनिर्मितै-	२.४१		

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

APPENDIX I

A description of the Vājapeya Yajña occurs also in 'Sawai Jai Singh Charita' (Ms. No. 336 Bhasha-P.K.) by Atmaram Kavi, son of Dhurandhar, who was a contemporary of Sawai Jai Singh. The following works of Dhurandhar and Atmaram are noted in the 'Index to the register of manuscripts in the Khasmohor collection':—

Dhurandhar Kavi who flourished in the time of Ram Singh and Vishnu Singh.

[1] Aṣṭāvakra Vairāgya (Bhāṣā)

[2] Ajñānabodhinī

[3] Alaṅkāravrajyā (for the pleasure of Ram Singh I)

[4] Govardhanodhharaṇalīlā Vyāyoga (composed at Mathura for Vishnu Singh in 1752 V.S.)

[5] Vajrasuchī Bhāṣā

[6] S'atapras'nottarī Bhāṣā

Atmaram s/o Dhurandhara Kavi

[1] Jai Singh Prakash (A Hindi translation of Raghuvaṁs'a under orders of Sawai Jai Singh).

[2] Rāmāyaṇa Bhāṣā or Amita-Kutuhala.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Relevant couplets about Vājapeya Yajña from Sawai Jai Singh Charit

॥ चौपई ॥

सदा बास जिन कासी माँहि ।
परंपरित वै ह्यांकै आहि ॥
देवभट्टसुव तप के धाम ।
गुरू हुते रतनाकर नाम ॥३८९॥

न्यायनिपुन परवीन कनाद ।
करि को सकै मिमंसावाद ॥
वैसेसिक रसनां कै अग्र ।
पाठ जिन्हैं वेदान्त समग्र ॥३९०॥

पातंजलि को सृष्टा आहि ।
कूरम करी प्रतिष्ठा ताहि ॥
बहुर्‌यौ तिन्हैं जानि सरवज्ञ ।
कहत भए करिबै कों जज्ञ ॥३९१॥

तिनहूँ तब सुमुहूरत देषि ।
वाजपेयमष उत्तम लेषि ॥
कीन्हौं स्याम-बाग आरम्भ ।
गाड्यौ विसद आनिकैं षंभ ॥३९२॥

कुआँ तहाँ रची लगि दूरि ।
अगिनि-कुंड तामैं फिर भूरि ॥
सामग्री अगनित वै आनि ।
समिध गनी गनती मैं जानि ॥३९३॥

प्रथम अध्वरज कहियत जहाँ ।
उदगाता दूजैं फिरि तहाँ ॥
होता निपुन वरनु तहँ कियौ ।
ऋत्विज भे हरषत जिन हियौ ॥३९४॥

अरु सदस्य आए तहँ और ।
आमिक्षा लषियत जहँ जौर ॥
उपाकरत भाषैं वै जिते ।
निकट परे विधिपूरुब तिते ॥३९५॥

पढत सामधेनी जु पवित्र ।
एकैं लीन्हें करनि धवित्र ॥
आहुति परन लगी तहँ जोर ।
तिल तंदुल जव मेवा ओर ॥३९६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कहूँ दही घृत मिले समान ।
होमत भए कूहूं परमान ।।
तृपत भईं तहँ तीन्यौं आगि ।
सिषा जाइ सुरपद लौं लागि ।।३९७।।

अमृत असन को जान्यौं भेव ।
तरसत हैं जाकौं सब देव ।।
चार्‌यौं बरन छतीसौं पौन ।
भोजन जाहि दिए नहिं कौंन ।।३९८।।

भौं तब जज्ञ अंत असनान ।
ता पोछैं कीन्हें सब दान ।।
करवायौ पहिलें इमि जाग ।
जातें जगे दुजनि के भाग ।।३९९।।

।। कबित्त ।।

चार्‌यौं बेदबेता धनु आयौ हाथ कहि कौंन
सकत एता अवनी जहाँ लौं दूर सी ।
'रामु कबि' ऋत्विज अनेक आचारज और
गनती गनावै कौंन कहैं मति ऊरसी ।।
जज्ञ कैं बिधान वाजपेई रतनाकर यौं
दीन्हें दान वाढी कित्ति सुरसरिपूर सी ।
पाई तहाँ पीछैं जिन दक्षिनां ऊ भूरिसी
निहारी तिन धामनि धनद कैसी भूरिसी ।।४००।।

नंदन तैं नीके जहाँ अवनी के आभूषण
षट रितु बनक बनाए बन बाग ते ।
'रामु कबि' कहै तहाँ देव से निहारियत
के तै भूमिदेय निज गुन पर भाग तैं ।।
जयसिंघ सवाई महाराज निसु दिन जहाँ
गजराज घूमैं ऊँचे ऐरावत नाग तैं ।
आमैरि अमरपुरी तातैं क्यौं न सोहै आज
कीन्हैं जहाँ जागतैं अधिक सत जाग तैं ।।४०१।।

।। दोहा ।।

जज्ञ समापत भौ जबै, भूप भारती-भौंन ।
कूचु उदैपुर कौं कियौ, लैंन काज निज गौंन ।।४०२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Appendix II

GENEALOGY OF DEV BHATT*



* By curtesy of Shri Nand Kishore Pareek 'Nagarik', Jaipur.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Maharaja Sawai Man Singh II Memorial Series :

1. Catalogue of Manuscripts in the Maharaja of Jaipur Museum. 10.00
2. Literary Heritage of the Rulers of Amber and Jaipur (with an index of manuscripts in the Khasmohar collection.) 40.00
3. Ramavilasakavya 12.00
4. Sawai Jai Singh Charita by Atmaram Kavi (In press)

Other Publications :

1. Treasures of Indian Painting—six colour plates with Introduction and Notes by Dr. A. K. Das
   - Series No. 1 27.00
   - Series No. 2 30.00
2. Textile and Costumes in Maharaja Sawai Man Singh II Museum, Jaipur by Dr. C. M. Singh (In press)
3. Catalogue of Mughal Miniatures by Dr. A.K. Das (in preparation)
4. Miniatures of the Royal Ramayana by Dr. A.K. Das (in preparation)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Ramvilas Kavyam
MRP : 25
SIZE : 1 Size *15000031*

Kirtikant Sharma Collection, Najafgarh